Takshashila Project

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

॥ श्रीगणेशाय नमः ॥ गणेशं गिरिजां नत्वा गुरुं हरिहरौ तथा ॥ करोमि काल
बोधार्थं पद्धतिं दशकर्मणां ॥ तत्र प्रथमं सकलकर्मोपयोगीनि कुशकंडिक
ण्डोच्यते ॥ स्थंडिले पंचभूसंस्कारान् त्रिशिखिः कुर्यात् ॥ दर्भैः परिसमुह्य ॥ गो
मयेनोपलिप्य ॥ स्रुवेणोल्लिख्य ॥ अनामिकांगुष्ठेनोद्धृत्य ॥ उदकेनाभ्युक्ष्य
अग्निमुपसमाधाय ॥ दक्षिणतो ब्रह्मासनं ॥ उत्तरतः प्रणीतासनं ॥ तत्र ब्र
ह्मोपवेशनं ॥ यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव ॥ भवानीति वद
ते ॥ ब्रह्मानुज्ञातः प्रणीताप्रणयनं ॥ ईशानादि पूर्वाग्रैः दर्भैः रेक[illegible]
परिस्तरणं ॥ पात्रासादनं ॥ पवित्रच्छेदनानि त्रीणि ॥ प्रणीतौ ॥ पवित्रे द्वे ॥ प्रो
क्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमार्जनकुशाः ॥ उपयमनकु

Takshashila Project

रा:॥ समिध: तिस्र:॥ स्रुव:॥ स्रुच:॥ आज्यं॥ तंडुला:॥ क्षरीपात्रं चरु:॥ त्रिचित्रिह्य
रोह्व प्रिक्ष्य॥ त्रिस्त्याज्या॥ द्विआज्या॥ तत: प्रणीतोदकात् प्रोक्षण्या: स्थिष्टरणं॥
पवित्राभ्यां प्रोक्षण्या उत्पवनं॥ सव्यहस्ते कृत्वा दक्षिणेनाच्छादयेत॥ ताभिर
क्षिस्य तां प्रोक्षणं॥ ततो यथासादितपात्राणां प्रोक्षणं कृत्वा॥ प्रणीताग्न्योर्मध्ये
संचरे प्रोक्षणीं निधाय॥ आज्यस्थाल्यां तंदुला: प्रक्षेप:॥ तंदुलान् निष्पच्य
प्रणीतोदकमासिंच्य॥ अग्नेर्दक्षिणत आज्याधिश्रयणं॥ मध्ये चरोरधिश्रय
णं॥ उन्नयतो पर्यग्निकरणं॥ अन्येन च रोह्य स्रुवप्रतपनं॥ संमार्जकुशै: संमार्जनं॥ अग्र
मध्यं मूलेषु॥ प्रणीतोदकेनाभ्युक्षणं॥ अपहत्य निरसनं॥ अ दध्या
त॥ आज्यमुद्वासयेत्॥ तस्य चरोरुत्तरेण॥ तत: पवित्राभ्यामुत्पूय॥ प्रोक्षणं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ण्याभ्यग्नत्पुत्पवनं॥ आज्यवेक्षणं॥ अपद्रव्यनिरसनं॥ अभिघार्यचरोरुद्वास
॥२॥ नं॥ उद्वासितस्याज्यस्यपूर्ववत्॥ अभिघारणंशिष्टसंप्रदायगौरवात्॥ श्रोता
तिदेशात्॥ उपयमनकुशाग्रहणं॥ वामकरे॥ ततस्तिष्ठन्नेतिस्य:समिधअ
ग्नोआधायप्रोक्षणीशेषोदकेनसपवित्रहस्तेनपर्युक्षणंकुर्यात्॥ पवित्र
यो:प्रणीतागमनं॥ दर्व्यां॥ जान्वाच्यब्रह्मणान्वारब्धेस्रुवेणहोम:॥ आघारावा
ज्यभागौमहाव्याहृतय:॥ सर्वप्रायश्चित्तंप्राजापत्यंस्विष्टकृच्चैतंनित्यंसर्वत्र॥
एतान्यवदुर्दशाज्याहुतय:सर्वत्रब्रह्मणान्वारब्धेसंतिहोतव्या॥ आघारावा २॥
ज्यभागौ॥ ॐप्रजापतयेस्वाहा॥ इदंप्रजापतयेनमम॥ इन्द्रायस्वाहा॥ इदमि
न्द्रायनमम॥ अग्नयेस्वाहा॥ इदमग्नयेनमम॥ सोमायस्वाहा॥ इदंसोमायन

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

मम॥यदाचरु॰र्हविस्तदाग्नस्विष्टकृते चरोः स्विष्टकृद्धोमः॥अग्नये स्विष्टकृते स्वाहा॥
इदमग्नये स्विष्टकृते न मम॥ अथ भूराद्या नवाहुतयः॥ॐ भूः स्वाहा॥इदम
ग्नये न मम॥ॐ भुवः स्वाहा॥इदं वायवे न मम॥ॐ स्वः स्वाहा॥इदं सूर्याय न मम॥
ॐ त्वन्नो अग्ने॰ मुग्ध्यस्वाहा॥इदमग्नीवरुणाभ्यां न मम॥४॥स त्वन्नो अग्ने ऽवमो
षि स्वाहा॥इदं वरु॰॥५॥अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया अ
सि॥अया नो यज्ञं वहास्यानो धेहि भेषजं स्वाहा॥इदमग्नये भेषजाय न मम॥६॥
ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत
विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा॥इदं वरुणाय सवित्रे विष्णवे विश्वे
भ्यो मरुद्भ्यः स्वर्केभ्यः॥७॥उदुत्तमं॰ स्याम स्वाहा॥इदं वरुणायादित्यायादि प

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

तयेनमम॥ प्रजापतयेस्वाहा॥ इदंप्रजापतयेनमम॥९॥ आज्येमेव हविश्च
तद्दा अत्र स्विष्टकृत आज्येन संस्रवप्राशन॥ पवित्राभ्यां मार्जनं॥ पवित्र
॥३॥ प्रतिपत्तिः॥ बर्हिर्होमः॥ प्रणीताविमोकः॥ ब्रह्मणे पूर्णपात्रं॥ इतिकु
शंडिकाहोममात्रे सर्वत्र कर्तव्या जातकर्मणि न कर्तव्या॥ ॥अथ प्रथमविवा
हकर्म लिख्यते॥ ॥तत्र कन्यायाः पिता कृतमंगलस्नानः॥ मातृकापू
जनं॥ नांदीश्राद्धं कृत्वा ग्रहयज्ञं मंडपप्रतिष्ठापनं स्तंभरोपणं च विवा
हात् प्रथमदिने विवाहदिने वा कुर्यात्॥ समासांतरात्॥ कन्यायाः करे मद
नफलयुतं डोरकं बध्नीयात्॥ वरपितापि स्वगृहे मातृकापूजनं नांदीश्राद्धं च ॥३॥
कृत्वा ग्रहयज्ञं कुर्यात्॥ वरस्य करे मदनफलयुतं डोरकं बध्नीयात्॥ कन्या

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

दात्रोरुपोषणं यावत्कन्यादानं क्रियते ॥ ॥ अथ मधुपर्कस्यानयनं कुर्यात् ।
प्रथमं कन्यादातुर्यजमानस्य उत्तराभिमुखोपवेशनार्थं पत्न्याः सनं स्थाप
येत् ॥ पूर्वाभिमुखोपवेशनार्थं वरस्यासनं ॥ तदभिमुखोपवेशनार्थं कन्या
सनं स्थापयेत् ॥ समाचारात् वस्त्रेणाच्छाद्य तदुपरि कुंकुमेन स्वस्तिकानि कु
र्यात् ॥ तत्र विष्टरद्वयं कर्तव्यं ॥ पंचविंशतिदर्भैस्तैर्विष्टरो भवति ॥ ततः
ताम्रपात्रे आपः क्षीरं कुशाग्राणि दधि चंदनमक्षता ॥ दूर्वा सिद्धार्थका
श्चैव अष्टांगो अर्घ उच्यते ॥ एवं अर्घं विधाय ॥ चरणप्रक्षालनार्थमुदक
पाद्यं ॥ चरणप्रक्षालनार्थं पात्रं च ॥ आचमनार्थं शुद्धोदकपूरितं पात्रं ॥ कांस्य
पात्रे दधिमधुघृतानि कृत्वा द्वितीयेन कांस्यपात्रेण पिधाय मधुपर्कमाच्छाद

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

येत्॥ अचक्लेयं थिवंधनार्द्धनस्यं अंतर्द्धानवयं॥ चतुर्विंशतितंतुभिः श्याममा
चीकुंकुमरंजितां वरमांगे कुक्कवासादयेत्॥ वरवर्णसामग्री च दानअतिस्पर्द्ध
॥४ द्रव्यं इत्यादि सामग्रीविधाय॥ यजमानः पत्नि च स्वासने उपवीसयेत्॥ आचा
र्यो पि॥ ततो यथासमाचारं द्वारि निरांजितो वरो मंडपमुपेत्य स्वासने आगत्य
निषेदेत्॥ ॥ अद्येत्यादि दशकोऽस्मत्त्वार्कन्यादानार्थं प्रजापतिरूपिणं
वरं मधुपर्केणार्चयिष्ये॥ इति संकल्प॥ ततयजमानेवैरं प्रतिकुर्यात्॥
साधु भवानास्तामिनचयिष्यामो भवंतं॥ ॐ अर्चय इति वरब्रूयात्॥ यजमानो
विष्टरं हस्ते गृहित्वा आसित्॥ आचार्य विष्टरो विष्टरो विष्टर इति वदेत्॥ ७॥
ततो यजमानः प्रतिगृह्यतां इति वदेत्॥ ततो वरः प्रतिगृह्णामि इत्युक्त्वा तु भि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

प्रतिगृह्णीयात्॥ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा क
श्चाभिदासति विष्टर आसने वृत्तावुपविशेत्॥ ततो यजमानः पाद्यपात्रं गृही
त्वाऽऽचार्य यजमानवराः क्रमेण ब्रूयुः सकृत्॥ आचार्य पाद्यं ३॥ यजमान
प्रतिगृह्णतां॥ वरं प्रतिगृह्णामि॥ ततो वरस्य स्तुक्षिं पाद्यं गृहीत्वा विराजो
दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः इति स्वदक्षिणं
प्रक्षाल्य पुनः विराजो दोह० इति सव्यं पादं प्रक्षालयेत्॥ क्षत्रियादयो व
राः सव्यं पादं प्रक्षाल्य दक्षिणं पादं प्रक्षालयेयुः॥ समासाराद् यजमान
वरस्य पादप्रक्षालनं कुर्यात्॥ ततो यजमानो द्वितीयं विष्टरं दद्यात्॥ आचा
र्य० विष्टरो विष्टरो विष्टरः यजमानः प्रतिगृह्णतां वर प्रतिगृह्णामि तं विष्टरद्व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

क्षिप्रनिगृह्लतां वर्ष्मोस्मि० इति विष्टरं पादयोरधः कृत्वा उपविशेत्॥ ततो यज
मानः अर्घं वराय दद्यात्॥ आचार्य० अर्घो ३ यजमान प्रतिगृह्लतां॥ वर प्रतिगृ०
॥५॥ आपस्थ युष्माभिः सर्वान्कामानवाप्नवानि इति प्रतिगृह्य तां अर्घं शिरसाभि
वंद्य॥ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टास्माकं वीरा माप
रासेचि मत्पयः॥ इति निनयं नभिमंत्रयेत्॥ इद्धेच हस्तमर्घ्यः॥ ततो यजमान
आचमनीयं जलं वरांय दद्यात्॥ आचार्य आचमनीयमाचमनीयमाचमनीयं
यजमान प्रतिगृह्लतां॥ वरः प्रतिगृ०॥ तूष्णीं प्रतिगृह्लतां॥ आमागन्यशसा स ॥५॥
ंसृज वर्चसा॥ तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनाम्॥
इति आचमनं कुर्यात् त्रिः द्विः तूष्णीं॥ ततो यजमानो मधुपर्कं दद्यात्॥ पञ्चमेकं घ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नं चैव द्विपलं दधि उच्यते ॥ पलार्द्धं मधुकं चैव मधुपर्को विधीयते ॥ आचार्यो म
धुपर्को मधुपर्को मधुपर्कोः यजमान प्रतिगृ० वरः प्रतिगृ० ॥ यजमानकरस्थं उ
ऊर्द्धाटितं मधुपर्कं मित्रस्य त्वा चक्षुषा प्रतीक्ष इति पश्यत् ॥ ततो देवस्य त्वा इत्या
न्त्यां प्रतिगृह्णामि इति प्रतिगृह्य सव्ये करे कृत्वा ॥ दक्षिणस्यानामिकया त्रिः प्र
म योति ॥ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि इति च आलोड्य अनामि
कांगुष्ठेन तस्मात्किंचिदुद्धृत्वा रक्षिनहिं निक्षिपेत् ॥ एवं पुनर्वारद्वयं आ
लोड्य निक्षिपेत् ॥ ततः अनामिकांगुष्ठाभ्यां उद्धृत्वा यन्मधुनो मधव्यं परमं
रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्ना
दोऽसानि इति प्राशयेत् ॥ एवं पुनर्वारद्वयं प्राशयेत् ॥ मधुवाता ऋतायते इति प्रतिमं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

त्रंत्रिःप्राशयेत्॥अनशिष्टंउत्तरतआसीनायपुत्रायशिष्यायवादद्यात्॥स
॥६॥ र्वंवास्नायंच्छेत्॥अथवाअसंचरेनिनयेत्॥ततआचम्य॥अंगानिस्पृशेत्॥वा
ङ्मआस्येस्तु॥इतिमुखं॥नसोर्मेप्राणोस्तु॥नासिकाद्वयंयुगपत्॥अक्ष्णोर्मे
चक्षुरस्तु॥चक्षुर्युग्मंयुगपत्॥कर्णयोर्मेश्रोत्रमस्तु॥दक्षिणकर्णंपुनरनेनवामक
र्णं॥बाह्वोर्मेबलमस्तु॥दक्षिणबाहुं॥पुनरनेनवामबाहुं॥ऊर्वोर्मेओजोस्तु॥ऊरुद्व
यंयुगपत्स्पृशेत्॥अरिष्टानिमेअंगानितनूस्तन्वामेसहइतिहस्ताभ्यांशीर्षादिपा
दांतंस्पृशेत्॥ततोयजमानःगौर्गौर्गौःउत्सृज्यतांइतिवरंप्रतिब्रूयात्॥ततोवर
स्यमातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिःप्रनुवोचं
चिकितुषेजनायमागामनागामदितिंवधिष्टममचअमुकशर्मणोवरस्यच

Takshashila Project

मुकस्य च अमुकशर्मणः यजमानस्य पाप्मा हतो मृत्युरजरस्तपाणां न्यस्तु इति पठेत्॥
अत्रावसरे पंच नवसंस्कारान् कृत्वा अग्निं स्थापयेत्॥ ततः अलंकृतां कन्यां आनी
य वराग्निमुखीं पूर्वस्थापिते आसने उपविश्य॥ अंतःपटं निपटं धारयेत्॥ ततो वरः
एनां वासः परिधापयति॥ जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा॥
शतं जीव शरदः सुवर्चा रयिं च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वास इति॥
समाचारात् पूर्वं परिधत्तमेव वस्त्रं स्पर्शयेत्॥ ततः एनां उत्तरीयं परिधापयति॥ वरः या
अकृंतन्नवयं या अतन्वत॥ याश्च देवीस्तंतूनभितो ततंथ॥ तास्त्वा देवी रजर
से संव्ययस्वायुष्मतीदं परिधत्स्व वासः॥ अथाचार्यः परस्परं समंजेयाम् इति
वदेत्॥ ततो वधूवरौ परस्परं समंजतः समंजंतु विश्वे देवाः समापो हृदयानि नौ॥ सं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

म्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥ अनेन मंत्रेण ॥ वरस्यैव मंत्रपाठः ॥ अत्र आवस
११७ रे समाचारात् ॥ गो ॥ अथ वरोचारणं अथ वरस्य पश्चात् कन्यायाः चारं च यं कुर्यात् ॥
ततो वरवाचनी कर्म आह ॥ ततो यजमानः कुर्यात् ॥ प्रजापति रूपिणे वराय यां च परि
कल्पयामी ॥ अस्तु ॥ प्रजा० ॥ इजन्तं० ॥ अत्र कुंडलमुद्रीका वासांसि उपवीतं च
प्रजापति रूपीणे वरासं प्रददे ॥ वरवासनी कर्म आह सांगतासिध्यर्थं ब्राह्मण
त्रजो जयिष्ये ॥ दक्षिणा मुरलवासं चाहं संप्रददे मधुपर्केण वरस्यार्चनं सां
गतासिध्यर्थं प्रजापति रूपिणे वराय गां संप्रददे ॥ अद्य पूर्वोच्चरित० वरस्य म ११७
धुपर्कार्चन विधौ वाचनीक श्राद्ध विधौ च यन्न्यूनं यदतिरिक्तं तत्सर्वं ब्राह्मणा
नां वचनात् ॥ गणेशां विकर्याः प्रसादात् सर्वं परिपूर्णमस्तु उत्तरे कर्म णम निर्वि

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

अमस्तु ॥ तलोलग्नसमये कन्यादानं कुर्यात् ॥ यजमानः अद्य श्रीब्रह्मणो द्वितीये
परार्द्धे एवं देशे काले च यथा राज्ञ्यालंकृतां अमुकनाम्नीं कन्यां कन्यादानोक्तस
त्सलोकफलप्राप्त्यर्थं पूर्वापरानेकवंशोद्धारणार्थं अमुकगोत्रप्रवरो ऽमुकनामाहं
अमुकगोत्रायामुकप्रवराय अमुकशर्मणे प्रजापतिस्वरूपिणे वराय प्रजोत्पाद
नाय जायात्वेन तुभ्यमहं संप्रददे कन्याया वरं गृहीत्वा वरदक्षिणां दद्यात् त
दैवकन्यायाः जननी समाचारात् मया पिदत्ता इति वदेत् ॥ ततो वरः स्वस्ति प्र
तिगृह्णामि इति वदेत् ॥ तस्मिन्नवसरे कन्यादानस्यागतासिद्ध्यर्थं अग्निदैवतं हि
रण्यं रुद्रदैवत्यां गां यमदैवत्यां महिषीं पंचवरुणस्य दैवत्यानि वासांसि इ
त्यादि प्रजापतिरूपिणे वराय अहं संप्रददे ॥ यत्किंचिद्देयद्रव्यं परिकल्पि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ततस्य संकल्पं कुर्यात्॥ न्यूनातिरिक्तदोषपरिहारार्थं कन्यादानसांगतासि
॥८॥ द्ध्यर्थं तानानां गोत्रेभ्यो ब्राह्मणेभ्यो न्यूयसि दातुमहमुत्सृजे इति संकल्पं ततो व
रः को दात् कस्मा॥ अग्नेत्यत्वा इति पठेत॥ अत्रावसरे देशाचारात् ससरजलतां
बूलरागं वधुवरयोः करे स्थापयेत्॥ वधुवरयोः कंठे वरमालां च आरोपयेत्॥ ग्रा
लं च ग्रंथिं कुर्यात्॥ ततो पुण्याहवाचनं तिलकं आशिर्वादं अथ पठेत्॥ एवं पिता
दत्तां कन्यां प्रतिग्रहविधिना आदाय तां करे गृहीत्वा निष्क्रामति वरः यदेषि ॥८॥
मनसा दूरं दिशोनुपवमानो वा हिरण्यपर्णो वैकर्णः सत्वा मनसा करोतु
असाविति वधुनाम गृहणं सम्मा चारात् तत्र स्थ एवं वरः पठेत्॥ निष्क्रम्य नरा
पश्चात् उदकुंभं स्कंधे कृत्वा आसनेर्द दक्षिणतः उत्तरतो वा कश्चन वाग्यतः तिष्ठेत्॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

आचार्यः वधूवरौ सन्मुखयति पटमपसार्य परस्परं समीक्षेयाताम्॥ ततः परस्परावेक्ष
णं कुर्वियातां॥ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीर
सूर्देवकामा स्योना शंनो भव द्विपदे शं चतुष्पदे॥ सोमः प्रथमो विविदे गंधर्वो
विविद उत्तरः॥ तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ सोमो ददद्गंध
र्वाय गंधर्वो दददग्नये॥ रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां॥ सा नः
पूषा शिवतमामेरय सा न ऊरू उशती विहर॥ यस्यामुशंतः प्रहराम शेपं
यस्यामु कामा बहवो निविष्ट्या इति वरो ब्रूयात्॥ ततः वरस्य चतुर्हस्तं प
रिमितं चतुरस्रं नानालंकारवितानमंडपादिशोभितं चतुर्विदिक्षु
न्यस्तुपरिस्तर जित नानाभांडैः पंच सप्त नवसंख्याकैर्विकल्पेनार्चि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

तांचतुर्दिक्षुनागपाशनागपाशयुताश्वर्वमिवसुरचितांवेदिंवधूवरौअन्नु
पेयातां॥प्रसादात्पूर्वमग्निस्थापनंनकृतंचेत्तदापंचभूसंस्कारान्कृ
॥१९॥ त्वा॥वेदिमध्यगोजेस्थंडिलेअग्निस्थापयेत्॥वधूवरौतमग्निंप्रदक्षि
णीकृत्यअग्नेःपश्चात्स्थापितेतेजनीत्वशाविशेषासनकटंवापीठास
नेवासदक्षिणचरणेनप्रदक्षिणमुपविशयेत्॥वरःवरादक्षिणागेवधूरु
पविशेत्॥ततोऽग्नेःप्रवेशनादिचरुवर्जंकुशकंडिकांकुर्यात्॥प्रासादनो ॥१९॥
त्तरंउपकल्पयेत्॥शमीपलाशमिश्रांलाजाःप्रष्टवीहयः॥शूर्पं॥कुमार्या
भ्राता॥दृषत्तद्वस्याद्युपकल्पयेत्॥पश्चात्संगतेअग्नेन्वारब्धेस्रुवेणहोमः॥
ॐनमःप्रजापतयेस्वाहा॥इदंप्रजापतयेनममा॥इन्द्रायस्वाहा॥इदमिन्द्राये

॥

नमम॥ अग्नये स्वाहा॥ इदमग्नये न मम॥ सोमाय स्वाहा॥ इदं सोमाय न मम॥ ए
षोदेव॰ ततो योजकनाम्नो वैश्वानरस्य पूजनं॥ ततो राष्ट्रभृद्धाः प्रजापतिव
र्जेऽसृषाहुतयः॥ भूः॥ भुवः॥ स्वः॥ त्वं नः॥ स त्वं नः॥ अयाश्चाग्ने॥ ये ते
शतं॥ उदुत्तमं॥ ८॥ मंत्राख्या गायत्र्यपूर्वे मुक्ताः॥ ततः आज्येनैव राष्ट्रभृद्धो
मः॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्
॥ इदमृताषाडे ऋतधाम्नेऽग्नये गंधर्वाय॥ १॥ ऋताषाडृतधामाग्निर्गंधर्वस्य
स्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा॥ इदमोषधीभ्योप्सरोभ्यः॥ २॥
संहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इ
दं संहिताय विश्वसाम्ने सूर्याय गंधर्वाय॥ ३॥ संहितो विश्वसामा सूर्यो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

गंधर्वः स्तस्य मरीचयोप्सरस आयुवो नाम ताभ्यः स्वाहा ॥ इदं मरीचिभ्योप्सरोभ्यो आयु
भ्यः ॥ ४ ॥ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः स न इदं ब्र० वाट् ॥ इदं सुषुम्णे सूर्यरश्मये चं
द्रमसे गंधर्वाय ॥ ५ ॥ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुर
यो नाम ताभ्यः स्वाहा ॥ इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यः ॥ ६ ॥ इषिरो विश्वव्यचा वातो गंध
र्वः स न इदं ब्र० वाट् ॥ इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय ॥ ७ ॥ इषिरो विश्वव्यचा वा
तो गंधर्वस्तस्यापो अप्सरस ऊर्ज्जो नाम ताभ्यः स्वाहा ॥ इदमद्भ्योप्सरोभ्यो न मम ॥ ८ ॥ भुज्युः सुप
र्णो यज्ञो गंधर्वः स न इदं ब्र० वाट् ॥ इदं यज्ञाय गंधर्वाय न मम ॥ ९ ॥ तस्य दक्षिणा अप्सरसस्तावा
नाम ताभ्यः स्वाहा ॥ इदं दक्षिणाभ्योप्सरोभ्यो न मम ॥ १० ॥ प्रजापतिर्विश्वकर्मा मनो गंधर्वः ॥
स न इदं ब्र० वाट् ॥ इदं मनसे गंधर्वाय न मम ॥ ११ ॥ तस्य ऋक्सामान्यप्सरस एष्टयो नाम ता

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

न्यः स्वाहा॥ इदमकूलामि न्योसारोन्योनमम॥२२॥ ॐ चित्ताय स्वाहा॥ इदं चित्ताय
नमम॥१॥ चित्त्यै स्वाहा॥ इदं चित्त्यै॥२॥ आकूताय स्वा॥ इदमाकूता॥३॥
आकूत्यै स्वाहा॥ इदमाकू॥४॥ विज्ञाताय स्वाहा॥ इदं विज्ञाताय॥५॥ वि
ज्ञानाय स्वाहा॥ विज्ञानाय॥६॥ मनसे स्वाहा॥ इदं मनसे॥७॥ शक्वरीः स्वाहा॥
इदं शक्वरीभ्योन॥८॥ दर्शाय स्वाहा॥ इदं दर्शाय॥९॥ पौर्णमासाय स्वाहा॥
इदं पौर्णमासाय॥१०॥ बृहते स्वाहा॥ इदं बृहते॥११॥ रथंतराय स्वाहा॥ इदं
रथंतराय नमम॥१२॥ ॐ प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतना ज्ये
षु॥ तस्मै विशः समनमंत सर्वाः स उग्रः स इहव्यो बभूव स्वाहा॥ इदं प्रजापत
ये जयानिंद्राय नमम॥१३॥ अथाभ्यातानमंत्राः॥ अग्निर्भूतानामधिपति

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षेत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यां
॥१२॥ देवहुत्यांꣳस्वाहा॥इदमग्नयेभूतानामधिपतये॰॥इंद्रोज्येष्ठानामधिपति
समा॰देवहुत्यांꣳस्वाहा॥इदमिंद्रोज्येष्ठान॰॥यमःपृथिव्यानाधिपतिसा॰स्वा
हा॥इदंयमायपृथिव्यानाम॰॥उदकोपस्पर्श॥वायुरंतरिक्षस्यनामधि
पतिस॰ꣳस्वाहा॥इदंवायवेनरिक्षस्यानाम॰॥सूर्योदिवोधिपतिःस
ꣳस्वाहा॥इदंसूर्यायदिवोधि॰॥चंद्रमानक्षत्राणामधिपतिस॰ꣳस्वाहा॥ ॥१२॥
इदंचंद्रमसेनक्षत्राणाम॰॥बृहस्पतिर्ब्रह्मणोधिपतिसमाव॰ꣳस्वाहा॥इ
दंबृहस्पतेब्रह्मणोधिपत॰॥मित्रःसत्यानामधिपतिस॰स्वाहा॥इदंमी
त्रायसत्यानामधी॰॥वरुणोपानामधिपति॰स्वाहा॥इदंवरुणोपानाम

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

धिपत॰॥समुद्रःस्रोत्यानामधिपतिस॰॥इदंसमुद्रस्रोत्यानामधि॰॥अन्न
ꣳसाम्राज्यानामधिपतिस॰॥समुद्रस्रोत्यानामधीपत॰॥अन्नꣳसाम्राज्यानाम
धिपत॰॥सोमओषधीनामधिपतिस॰॥इदंसोमओषधीनामधिपत॰॥स
विताप्रसवानामधिपतिस॰॥इदंसवित्रेप्रसवानामधिपत॰॥रुद्रपशूनाम
धिपतिस॰॥इदंरुद्रायपशूनामधिपतये॰॥उदकोपस्पर्शः॥त्वष्टारूपाणा
मधिपति॰॥इदंत्वष्ट्रेरूपाणामधिपत॰॥विष्णुपर्वतानामधिपतिस॰॥इदं
विष्णवेपर्वतानामधिपतये॰॥मरुतोगणानामधिपति॰॥इदंमरुद्भ्योगणा
नामधिपतये॰॥पितरःपितामहाःपरेवरेततास्ततामहाःइहमावतास्मि
न्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहुत्या

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ं स्वाहा ॥ इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यः ततेभ्यः ततामहेभ्यः ॥ उदको
पस्पर्शनं । ॐ अग्निरेतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात् तदयं
॥१२॥ राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा ॥ इदमग्नये ॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ॥ अशून्योपस्था जी
वतामस्तु माता पौत्रमानंदमभिविबुध्यतामियं स्वाहा ॥ इदमग्नये ॥ स्वस्ति
नो अग्ने दिव आ पृथिव्या विश्वानि धेह्ययथा यजत्र ॥ यदस्यां महि दिवि जातं
प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा ॥ इदमग्नये ॥ सुगं नु पंथां प्रदिश ॥१२॥
न्न एहि ज्योतिष्मद्धेह्यजरं न आयुः ॥ अपैतु मृत्युरमृतं न आगाद्वैवस्वतो नो
अभयं कृणोतु स्वाहा ॥ इदं वैवस्वताय न मम ॥ समाचारादग्नेरुत्तरतो न पदं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

दक्षिणतः॥ परं मृत्यो अनुपरेहि पंथां यस्ते अन्य इतरो देवयानात्॥ चक्षुष्मते
शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा॥ इदं मृत्यवे॥ चतुर्भौ स्नानाः॥
उदकोपस्पर्शः॥ अथ लाजाहोमः॥ सप्ताञ्चाद्वधूवरयोः करविश्लेषं कृत्वा तावद्वलरा
गमंन्यत्र स्थापयेत्॥ लाजाहोमकाले कुमार्या भ्राता सप्तधा चाराल्लाजाग्रञ्जलीन्द
द्याद्दिते कुमार्या अंजलौ समीपलाशपुटेन लाजानश्च विपेत्॥ अंज
लिस्थानेव लाजान्वारत्रयं मंत्रेण तिष्ठती कुमारी सहितेनांजलिना जुहुयात्॥ अ
र्यमणं देवं कन्या अग्निमयक्षत॥ स नो अर्यमा देव प्रेतो मुंचतु मा पतेः स्वाहा॥ इ
दमग्नये॥ इति प्रथमं॥ इयं नार्युपब्रूते लाजानावपंतिका॥ आयुष्मानस्तु मे पति
रेधंतां ज्ञातयो मम स्वाहा॥ इदमग्नये॥ इति द्वितीयं॥ इमांल्लाजानावपाम्यग्नौ सम

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

दशकर्म.

५२ द्धिकरणंतव ॥ ममतुभ्यंचसंवननंतदग्निरनुमन्यतामियꣳस्वाहा ॥ इदम० ॥
इतित्रितयं ॥ अथवध्वाःसांगुष्ठंदक्षिणंकरंसतांबूलरागंवरःस्वदक्षिणकरेणगृ
ह्णीयात् ॥ गृभ्णामिते ॥ सौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः ॥ भगोअर्यमा
सवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः ॥ अमोहमस्मिसात्वꣳसात्वमस्यमोअहं ॥
सामाहमस्मिऋक्त्वंद्यौरहंपृथिवीत्वं ॥ तावेहिविवहावहैसहरेतोदधावहै ॥ प्रजां
प्रजनयावहैपुत्रान्विन्दावहैबहून् ॥ तेसंतुजरदष्टयःसंप्रियौरोचिष्णूसुमन
स्यमानौ ॥ पश्येमशरदःशतंजीवेमशरदःशतꣳशृणुयामशरदःशतं ॥ इतिकरंसं
गृह्य ॥ वधूपुरस्कृत्यअग्नेरुत्तरतःस्थापितमश्मानंउपरिदक्षिणपादेनवधूंआ
रोहयेत् ॥ वरः ॥ आरोहेममश्मानमश्मेवत्वꣳस्थिराभव ॥ अभितिष्ठपृतन्यतोवबा २३

Takshashila Project

धस्वपत्नना पत्न इति ॥ आरोहयेत् ॥ अथ गाथां गायन्ति वरः सरस्वति प्रेदमव सुभ
गे वाजिनीवति ॥ यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ॥ यस्यां भूतं समभ
वद्यस्यां विश्वमिदं जगत् ॥ नाम द्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः इति ॥
अथ अग्नेर्वधूवरौ अग्नेः प्रदक्षिणं कुर्यातां ॥ तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतुना स
ह ॥ पुनः पतिभ्यो जायां दा अग्ने प्रजया सह इति ॥ अग्नेः पश्चिमतो यथास्थाने आग
स कुमार्या भ्राता इति लाजाहोमादि परिक्रमणांतं ॥ पुनर्वारद्वयं सर्वमपि तथैव
कुर्यात् ॥ तृतीयप्रदक्षिणानंतरं वधूवरयोः करविश्लेषं कृत्वा शूर्पे ऊर्वरितान्
लाजान् शूर्पकोणेनाग्नेस्तिष्ठन्ती करः चतुर्थवारे एवं जुहुयात् ॥ भगाय स्वाहा ॥ इ
दं भगाय ॥ ततः समाचारात् करग्रहणमकृत्वैव वरः अग्नेर्न्यवाव वधूवरौ नूतनौ मे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

वाग्नेः चतुर्थपरिक्रमणं कुर्यातां ॥ अत्र समाचारात् शालकं वस्त्रादिना तौ बधयित्वा ॥
वधूवरौ स्वासने उपविशेतां ॥ ततः अवशिष्टहोमः ॥ प्रजापतये स्वाहा ॥ इदं प्रजा
पतये ॥ अथ सप्तपदी प्रक्रमणं ॥ समाचारात् दक्षिणतः पुंगीफलैः सप्तपुंजान् उदकुंभ
स्थान् कृत्वा वरः वध्वाः दक्षिणपादं गृहीत्वा सप्तपुंजोपरिक्रमेण न्यसेत् ॥ एकमिषे विष्णु
स्त्वानयतु ॥ द्वे ऊर्जे विष्णुस्त्वानयतु ॥ त्रीणि रायस्पोषाय विष्णु० ॥ चत्वारि मायोभवा
य वि० ॥ पंच पशुभ्यो वि० ॥ षड् ऋतुभ्यो वि० ॥ सखे सप्तपदा भव सा मामनुव्रता भव वि
ष्णुस्त्वानयतु ॥ एवं क्रमेण उदीचीः सप्तपदानि प्रक्रामयेत् ॥ स्कंधे धृतात् तस्मादुद
कुंभात् उदकं गृहीत्वा वधूमूर्द्धनि अभिषिंचति वरः ॥ आपः शिवाः शिवतमाः
शांताः शांततमास्तास्ते कृण्वंतु भेषजं ॥ आपो हिष्ठा० ३ ॥ अभिषेकं कृत्वा ॥ अथ

नांवधूं सूर्यमुदीक्षयति वरः सूर्यमुदीक्षस्व तच्चक्षुर्देवहितं० शतानात् ॥ इति ध्रुवं पश्येत ॥
यदि दिवा विवाहः स्यात् ॥ अथ वरः स्वदक्षिणं हस्तं वध्वाः दक्षिणांसोपरि नीत्वा अधि
हृदयं आलभते ॥ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु ॥ मम वाच
मेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यं ॥ अथैनां वधूं पश्यतः अभिमंत्रये
त् ॥ वरः सुमंगलीरियं वधूरिमां समेत पश्यत ॥ सौभाग्यमस्यै दत्वा याथास्तं वि
परेतन ॥ ततः समाचाराद्वधूं वरस्य वामभागे उपवेश्यः पतिपुत्रवत्यश्च तस्त्रियो
वधूवरयोः स्वस्तिकं कृत्वा वध्वाः दक्षिणे कर्णे वदेयुः ॥ सौभाग्यवती पुत्रवती भव ॥ त
तस्तां वधूं गृहीत्वा प्राग्वोदग्वा नुगुप्ते गृहे रक्तं वृषभस्य चर्मणि उपवेशयेत ॥ वरः इह
गावो निषीदंत्विहाश्वा इह पूरुषाः ॥ इहो सहस्रं दक्षिणो यज्ञ इह पूरुषा निषीदंतु इति

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

समाचारात्तत्र स्थेय एव ततो अभिमृश्य मंत्रं पठेत् ॥ विवाहे वृद्धवचनाद्वा तद्देशकुलाचा
रः प्रमाणत्वेन कर्तव्यः ॥ ततः आज्येनैव स्विष्टकृत् ॥ अग्नये स्विष्टकृते स्वाहा ॥ इदं० ॥ सं
स्रव प्राशनं ॥ आचार्याय वरं दद्यात् ॥ ब्राह्मणो वरश्चेत्तेगौर्देयात् ॥ राज्ञा ग्रामो देयात् ।
वैश्येनाश्वो देयः ॥ अनुक्तेनापि शूद्रेण धनं देयं ॥ रात्रौ चेद्विवाहस्तदा ध्रुवं दर्शय
ति ॥ वरः ध्रुवमुदीक्षस्व ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादात्
बृहस्पतिर्मया पत्या प्रजावती सं जीव शरदः शतं ॥ इति वधूर्यदि ध्रुवं सूक्ष्मरूपं न पश्ये
त् । तदापि पश्येवैमिदं इत्येवं ब्रूयात् ॥ ततस्त्रिरात्रं वधूवरयोः अक्षारालवणं मधुरं हवि
रेव प्राशनं च ॥ संवत्सरं द्वादशरात्रं षड्रात्रं त्रिरात्रं वा यथासंभवं मैथुनं न कुर्यात् ॥
ततः समाचारात् कुलदेवतासमीपं गत्वा गणेशांबिका कुलदेवताश्च पूजयित्वा ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वध्वासहसुमंगलवाद्यघोषैरात्स्वगृहमागच्छेत्स्वरः ॥ ॥ इतिविवाहकर्मसमाप्तः
॥ ॥ अथचतुर्थीकर्म ॥ ॥ विवाहादूर्ध्वंचतुर्थ्यारात्रेः अपररात्रेगोदिती
येह्निवासद्योकुर्यात् ॥ तत्रगृह्याग्नेरनंतरतःपंचभूसंस्कारपूर्वकमग्निंस्था
पयित्वाअग्निमीशेनादिचसप्तपरिस्तरणंकुर्यात् कुंडिकांकुर्यात् ॥ अग्ने
रुत्तरतःएकमुदपात्रंपंचानांआकृतीनांचगोकृतंसंस्रवपात्रंपात्रंस्थापये
त् ॥ चरुंश्रपयेत् आज्यंसमारात्... पात्रंचतुरोआज्याहुतीर्जुहुयात्
तैःविराडितिमनुवाकपुरुषसूक्तं... शिवसंकल्पमंत्रआज्यजपःकर्तव्यः
॥ पशुस्तं... प्रजापतयेस्वाहा ॥ इदंप्र० ॥ इंद्राय० ॥ इदं० ॥ अग्नय० ॥
इदं० ॥ सोमाय० ॥ इदं० ॥ एषोहदेवं० ॥ साकिनाग्निवैश्वानरायस्वाहेति ॥ आज्या

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

कृतयः॥ अग्नेप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उ
पधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदमग्नये॥ वायो प्र
॥५६॥ यश्चित्ते त्वं देवानां॰॥ यास्यै प्रजाघ्नी तनूस्ता॰ स्वा॥ इदं॰॥ सूर्य प्रायश्चित्ते त्वं दे
वानां॰ यास्यै पशुघ्नी तनूः॰ स्वा॥ इदं सूर्याय॥ चंद्र प्रायश्चित्ते त्वं दे॰ यास्यै गृहघ्नी
तनूः॰ स्वा॥ इदं चंद्रमसे॥ गंधर्व प्रायश्चित्ते त्वं दे॰॥ यास्यै यशोघ्नी तनूस्ताम
स्यै नाशय स्वाहा॥ इदं गंधर्वाय॥ ॥ अथ स्थालीपाकहोमः॥ प्रजापतये स्वा
हा॥ इदं प्र॰॥ एतासामाहुतीनां संस्रवमुदपात्रे निःक्षिपेत्॥ ततः चरोः स्विष्टकृ ॥५६
त्॥ अग्नये स्विष्टकृते स्वाहा॥ इदं॥ भूराद्या नवाहुतयः॥ भूः॥ इ॰॥ भुवः॥
इदं॰॥ स्वः॥ इ॰॥ त्वंन॰॥ सत्वंन॥ अया॰॥ ये ते शतं॰॥ उदुत्तमं॰॥ प्रजापत

Takshashila Project

कः॥ पुन्याहवा॥ मंत्राशिला दोष्य आचार्यं कुर्यात्॥ ततः समाचारात् स्वधूववरौ कुलदे
वतासमीपगत्वा संस्थाप्य अग्निपत्न्युतमं उपमा॥ ग्न्यमउपवक्षीपनं वधूवरौ कुर्यात्॥
वेदिकाकोणस्योपरी तन्नं स्कंधं उवधूउत्तारयेत्॥ पश्चात् वृध्यासह गीतवाद्यमंग
लघोषेण स्वगृहमागत्य वरं॥ ॥इति चतुर्थीकर्म समाप्तः॥ ॥अथ गर्भाधानं॥
गर्भाधानं तु सर्वं कुर्यान्न स्ति॥ शाखांतरस्य वा दोषकोलं च लिक्ष्यते॥ गर्भाधानाद
यः सीमंतोन्नता संस्कारः स्त्रियाः प्रथमगर्भे एक कर्तव्या॥ ऋतुवती भार्या चतुर्दिनस्ना
नंतरं स्नानं कुर्यात्॥ तच मातृकाप्रजनं नांदीश्राद्धं कुर्यात्॥ स्नानसमये तच
जले घृतबिंदवी तत्स्कंधं प्रस्पेत्॥ आदीत्यं गर्भं॥ इति मंत्रेण॥ यदि वा गृहे स्ना
नं करोति तदा नेन मंत्रेण स्कंधं प्रस्पेत्॥ ततः रात्रौ वेवतामनिगच्छेत्॥ ऋतुदिना॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

ऋ॰शा॰कर्म॥

तस्मिन्काले पतिर्दीक्षितेतपाणिनाकौताभ्याः ऊरुअस्मार्यं योनिं अभिमृश्य ज
पेत्॥ ह्यमानगर्भस्सवितानेद्दातुरुन्दः कल्पयंतीति ले त्वा मगुं विष्णुर्योनिं क
ल्पयतु त्वष्टा रूपाणि पिंशतु॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भं
॥५८॥ धेहि सिनीवालि गर्भं धेहि पृथुष्टुके गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ
इति॥ ओं सुखं उदं सुखावातु पविष्टः सन् अनुसंधाय मंत्रेतारितोस्मृतं॥
अनेन मंत्रेण रेतस्यावर्णं कुर्यात्॥ पंचदशब्राह्मणभोजनसंकल्पः॥ अथ ऋतु
स्नातुस्नानानंतरं कृष्णरात्रीषु यावदुर्गेनंदधीततद्वा त्वा तु स्नोनोत्तरं पु ॥५८॥
ष्पनक्षत्रे स्त्रियं उपोष्य सिंहिनामश्वेतकंटकीऔषधि तस्याः मूलं समुत्पा
ट्यनीयरात्रौ जलेन सह तन्मूलं पेषयेत्॥ संन्यक पिष्ट्वा रजनि प्रकाश्य त

Takshashila Project

येस्वाहा॥इदं॥ततः स्वापितोदकणात्रादुदकमादायएनावधुंमूर्ध्नि निषिंचति॥
वरोयालेपरिधाप्यजाप्यैपशुप्यैगृहप्यैयशाप्यैनिंदितानन्द्रजारप्यैतत
एनां करोतिसाजीर्यत्वनयासह अनुकर्तान्नी॥ नतसंस्रवप्राशनं॥ कुशाप
विन्यासमार्जनं॥ इतिकर्मसमाप्य॥ नत्राजनेस्थालीपाकंतद्रूप॥ एनांव
धूस्थालीपाकंप्राशयतीवरोभोजनादूर्ध्वंशर्करादत्वासमप्येतंकन्यामादायच
धूसुरेवसकृत्प्राशयेत्॥ आरोहेत्प्रांगंस्वंदधाप्यस्थित्तिरस्थिनिमाईसे
नौह्स्मातिस्वमातालंचश्हति॥ अथसमाचाराद्वारवधूरुचंसकृत्प्राशयेत्॥ न
नपश्चाद्दंपतिप्राशयेत्व्यवचेष्यमश्नीताइतिव्यवहारः॥ एवंविवाहंकृत्वास्तु
कालन्लिंगवेतपयथाकालं॥ ॥ अथगर्भाधानकर्म॥ ॥ ऋतुस्नानांरोमात्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

काश्मनमांदीश्राद्धं निआयराचोलामन्तिगम्यंनिवेकानंतरहृदयालंजनंकुर्या
॥५७॥ त्रायतेसुरि॥ अथास्याचश्वाःदक्षिणांसोपरीस्थायदक्षिणहस्तेनीत्वाअ
धिहृदयमालभेत॥ मनोयत्तेसुशिमेहृदयंदीविचंद्रमसिश्रितंतुवेदाहंतन्मां
न्तविद्यात्पश्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतात्॥ स
मानावरादत्तेवधूदत्वाअनतनेत्रकुर्यात्॥ ततःसमाचारात्वधूवरयोःकुटु
बंधिनःवधूवरयोस्तीलकमाच्छीवादददत्वायथासंभवद्रव्यमाच्छत्यानादि
दद्यात्॥ ततआचार्यायजापकेभ्यश्चदक्षिणांदद्यात्॥ वरः॥ अन्येभ्यो
ऽप्यसिदक्षीणांदद्यात्॥ यदुक्तं॥ खडयज्ञेषुनिवाहेषुसंक्रांतौग्रहणे ॥५७॥
तथा॥ पुत्रेजातेव्यतिपातेदत्तंभवतिचाक्षयं॥ इतिवचनात्॥ ततःअभिषे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

स्याः दक्षिणनासापुटे आसिंचेत्॥ संन्यंकेति द्वं॥ इयमोषधी त्रायमाणा स
हमाना सरस्वती अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभं इत्यनेनासिंचेत्॥
एवं कृते गर्भं दध्यात्॥ ॥ इति गर्भाधानं॥ ॥ अथ पुंसवनकर्म॥ ॥ गर्भाधा
नोत्तरं गर्भस्पंदनात्पूर्वं द्वितीये तृतीये वा मासे मृगादि पुंनक्षत्रस्थे चंद्रे शु
भमुहूर्ते दिने मातृकापूजनं नांदीश्राद्धं कृत्वा गर्भवतीस्त्रियं उपवासं कारये
त्॥ स्त्री स्नानं कृत्वा आहृतेवाससी परिदध्यात्॥ ततः न्यग्रोधावरोहान् शुंगा
अंबटजटावटांकुरान्॥ दर्भं कृद्दकं सोमवल्ली विकल्पेन राजौ जलेन सप्पि
ष्टा रजनिष्कारयतस्याः दक्षिणनासापुटे आसिंचेत्॥ हिरण्यगर्भः सम॥
अग्रे समवर्तत॥ ॥ एताभ्यां मंत्राभ्यां आसिंचेत् इति॥ पंचदशावाग्लानेभ्यो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

जनं॥ अनुपयोगित्वात् द्रन्यन लिखितं॥ ॥इति पुंसवनकर्म॥ ॥अथ सीमंत
कर्म॥ ॥अथ प्रथमगर्भे गर्भाधानोत्तरं षष्ठे वा अष्टमे मासि पुंनक्षत्रे वा शुभदि
॥१९॥ ने॥ कृतमंगलस्नानो यजमानः॥ नित्यं कर्म कृत्वा ततो मातृपूजनं नांदीश्राद्धं च कुर्या
त्॥ ततो वहिःशालायां प्रत्यक्छेदं कृत्वा॥ स्थंडिले पंचभूसंस्कारान् कृत्वा लौकिका
ग्निं स्थापयेत्॥ ततो व्रलोपनेशानादिकुंडिकां कुर्यात्॥ आज्यभागादने तंडुलान्नदं
मुद्गास्तिलाँश्च॥ ततउपकल्पनीयानि॥ त्रिश्वेतरफलद्वयसंलग्नशलाका॥ त्रयो
दर्भाः॥ स्थानत्रयेश्वेतात्रेशलाली वीरतरशंकुः तार एव॥ पूर्णपात्रं॥ मृदुपिंड॥ ॥१९॥
वीणागाथिनौ च॥ उपकल्प्य॥ तिलमुद्गतंडुलमिश्रचरुं श्रपयित्वा॥ समाचारात्व
धूः स्वपितृगृहे स्नानं कृत्वा॥ अहतेवाससी परिधाय गीतवाद्यमंगलघोषैः पति

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

गर्भागस्य॥ ओं अग्नेः पश्चात्स्थण्डिले उपविशेत्॥ अथाज्याहुती॥ पर्युक्षणं ततः प्र
जापतये स्वाहा। इदं। इन्द्राय०॥ इदं०॥ अग्नये०॥ इदं०॥ सोमाय०॥ इदं०॥ सिमंतक
र्मणि मंगलसंज्ञो नाम्ना वैश्वानराय प्रजनं॥ ततस्त्रयोदशाहुति॥ प्रजापतये स्वाहा॥ इदं०॥
चरोः स्विष्टकृते॥ अग्नये स्विष्टकृते स्वाहा॥ इदं०॥ नवाहुतयः॥ भूः स्वाहा०॥ इदमग्न
ये॥ भुवः स्वाहा०॥ इदं वायवे॥ स्वः स्वाहा०॥ इदं सूर्याय॥ त्वं नो०॥ स त्वं नो०॥ अयाश्चाग्ने०॥
येते शतं॥ उदुत्तमं॥ प्रजापतये०॥ इदं०॥ ततः औदुंबरफलैकयुग्मदर्भत्रयं त्रयेणीश
ललीह्रणपात्रं चत्वारेण सह एकीकृत्य तेन वधूसीमंतं ललाटादुपरि शिरोम
ध्यभागस्थकेशान् विनयेत्॥ पतिः भूर्भुवः स्वर्विनयामि॥ एकवारमेव॥ अथवा
भूर्विनयामि॥ भुवो विनयामि॥ स्वर्विनयामि॥ वारत्रयं विनयेत्॥ ततो वधाः शिर

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सिद्धिर्वेष्टनेन आवध्नीयात्॥ अथ भ्रूजानन्तो वटकं उर्ज्जीफलिनी च वदति॥
अथारूढ विपणगाथिनो राजानं संगायेतां यो वा षंत्या वीरतरशति॥ सोमस्य
॥२०॥ नौ राजे मामानु वीथ्रजा॥ अविमुक्तचक्रा चासीरं स्तीरितु न्यं निकटवर्ती न्याम
शान घां गंगायमुनायं एवं नामगृह्णीयात्॥ ततः संस्रव प्राशनं॥ पवित्राभ्यां मा
र्जनं॥ पवित्रधृतिपत्नि॥ त्रणीता निर्मोकः॥ कूलतो भूर्णीयात्॥ समाचाराय
आचार्याय दक्षिणां दद्यात्॥ एकव्यापनेन योजनसंकल्पं कृत्वा सप्ततु क पंचद
शयामतणे योजनं संकल्पं कुर्यात्॥ ऋषि सीदत्ता॥ पुण्याहवाचनेतिलक ॥२०॥
मा शिवा चास्य कुर्यात्॥ ततः समाचारात् गोत्रदेवतानां समीपं च भूयश्चेतस्य
जनानां नमस्कारं कुर्यात्॥ तत्र कुलध्यानतः समाचारः कर्तव्यः॥ इति सीमंत

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कर्म॥ ॥अथ जातकर्म॥ ॥प्रसवसमये सूष्यन्तीं स्त्रियं जलेनाभ्युक्षेत्॥
पतिः एजतु दशमास्यो०॥ जरायुणा सहेति॥ ततः आसन्नप्रसवे०॥ अवैतु पृश्नि
शेवलं शुने जराय्वत्तवे नैव मांसेन पीवरी न कस्मिंश्च नायतनमव जरायु पद्यता
इति पठेत्॥ ततो जाते पुत्रे पिता शीतोदकेन स्नानं कुर्यात्॥ इदं सर्वमेव कर्म ना
लच्छेदनात्पूर्वमेव कुर्यात्॥ मातृकापूजनं कृत्वा आभ्युदयिकं हिरण्येन श्राद्धं
कुर्यात्॥ ततो बालकसमीपं गत्वा मेधाजननं कुर्यात्॥ तद्यथा॥ सुवर्णयुतया
दक्षिणानामिकया मधुघृते नैकीकृते संयुतं बालकं प्राशयेत्॥ भूस्त्वयि
दधामि॥ भुवः त्वयि दधामि॥ स्वस्त्वयि दधामि॥ भूर्भुवः स्वः सर्वं त्वयि द
धामि॥ कुमारस्य नाभ्यां वा दक्षिणे कर्णे जपेत्॥ अग्निरायुष्मान्स वनस्प

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयु आयुष्मांसोषधीभि
रायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ ब्रह्म आयुष्मत्तद्ब्राह्मणैरायुष्म
॥२२ त्तेन त्वायुषायुष्मं॰॥ देवा आयुष्मंतस्तेमृतेनायुष्मंतस्तेन त्वायुषा॰॥
ऋषय आयुष्मंतस्ते व्रतैरायुष्मंतस्ते त्वायुषा॰॥ पितर आयुष्मंतस्ते स्व
धाभिरायुष्मंतस्तेन त्वायुषा॰॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन
त्वायुषा॰॥ समुद्र आयुष्मान्स स्रवंतीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करो
मि॥ इत्यंतं वारत्रयं जपेत्॥ ततः त्र्यायुषं जम॰ युषं इत्यंतं जपेत्॥ ततः ॥२२॥
वाज्जायुष्कामनयाकुमारं अमंत्रं जपेत्॥ दिवस्परीप्रथमं जज्ञे इत्यारभ्य
दशकंडिकां विवक्ष इत्यंतं जपेत्॥ ततस्तत्र प्रतिदिशं पंच ब्राह्मणान्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नस्थापयेत्॥ चतुर्दिक्षु चत्वारः उपरिष्टात् अवेक्षमाणो ऽवस्थाप्य तान्
पिता ब्रूयात्॥ इममनुप्राणित॥ प्राणः पूर्वस्यो ब्रूयात् प्राण॥ दक्षिणस्यो
व्यान॥ पश्चिमस्य अपान॥ उत्तरतः उदान॥ उपरिष्टात् स्थितः पंचमः समा
न इति ब्रूयात्॥ ब्राह्मणा नावेधिता एव स्वतः तत्र गत्वा ततस्तान् सर्वं ब्रूयात् दिशि ४
ततो यस्मिन् देशे कुमारो जातस्तं देशं अभिमंत्रयेत्॥ वेद ते भूमि हृदयं दिवि
चंद्रमसि श्रितं॥ वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतं॥ अथ कुमारमभिमंत्र्य जपेत्॥ अश्मा भव परशुर्भव हि
रण्यमस्तृतं भव॥ आत्मा वै पुत्रनामासि स शतं जीव शरदः शतमिति॥ अथास्य कुमा
रस्य मातरमभिमंत्रयेत्॥ इदं जपेत्॥ इडासि ब्राह्मणा नावेपि एवस्य यं तत्र तत्र दिशि

Takshashila Project

गत्वा तत्सर्वं कुर्यात् ॥ २७ ॥ असि मैत्रावरुणी वीरे वीरमजीजनथाः ॥ सा त्वं वीरवती
भव यास्मान्वीरवतोकरदिति ॥ अथास्याः स्तनौ प्रक्षाल्य ॥ प्रथमं दक्षिणं स्तनं कु
॥२२॥ माराय धापयेत् ॥ इमं स्तनमिति मंत्रद्वये ॥ तत उदपात्रं प्रसूतायाः शिरःप्रदेशे निदध्या
त् ॥ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ ॥ एवमस्यां सूतिकायां सपुत्रिकायां जा
ग्रथ ॥ ततो द्वारदेशे सूतिकाग्निमुपसमाधाय नात्र कुंडिका दशदिनपर्यंतं
त्रयोः संध्ययोः फलीकरणमिश्रान् सर्षपानग्नौ जुहोति शंडामर्का उपवीरः शौंडि
केय [illegible]वीलः मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ॥ इति प्रथमा ॥
नात्र त्यागः ॥ अथवा समाचारात्तस्मिन्नेव काले विशति युग्मं न्याकुर्यात् ॥ शंडा ॥२२॥
मर्का ॥ आलिखन्तः ०॥ मंत्रे एवोहितव्याः ॥ स यदि कुमार उपद्रवेत् दापिताका

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

लंकृत्य संगोग्रहित्वा जालेन उत्तरीयेण वा प्रच्छाद्य जपेत् ॥ अथ वा समाचारात तते दे
वजपेत् ॥ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबंधनः ॥ चेचेच्छुनक सृज नमस्ते अस्तु सी
सरो लपेतापह्वरेन सत्यं ॥ यत्ते सर मामा ता सी स र पिता श्याम शबलो च्यातरो ॥
चेचेच्छु ॥ तापह्वर तद् इति जप्त्वा निमृशति न नामयति न रुदति न हृष्यति न ग्लाय
ति यत्र वयं वदामो यत्र चाभिमृशामसि ॥ ३ ॥ ततः शुचौ जाते व्यतीपाते दत्तबलि
च्चार्दं ॥ इति शुन्या निवेश कालक्लात्वा ॥ यथासंप्रवगो न्नहिरण्यादीदानं तिलैकं
मोशिं न्नयसीदद्यात् ॥ पंचदशाब्दालग्नो जनसंकल्पं ॥ शुन्या फलाचनं तिल
कमशीवादन्न कुर्यात् ॥ नमो नाजेघ दनं ॥ इदं जातकर्म शुभकालेन कृतं चेत
दागोण काले पिता मात्रकाष्ठजनन म्राच्छुदयिक श्राद्धपूर्व त्वातत श्राद्धुतकर्ण

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नाभ्यां दक्षिणे वा कर्णे जपति॥ अग्निरायुष्मानिति॥ कुमाराभिमर्शनं॥ अश्माभ
व॰ एतत्कर्मद्वयमेव कुर्यात्॥ ॥इति जातकर्म॥ ॥अथ नामकरणकर्म॥ ॥ए
॥२३॥ कादशेऽह्नि सूतिकाग्निं सूतिकां चोत्थाप्य स्नापयित्वा॥ मातृकापू
जनं नान्दीश्राद्धं च कृत्वा ब्राह्मणाननुज्ञाप्य पिता पुत्रस्य नाम कुर्यात्॥
द्व्यक्षरं चतुरक्षरं वा॥ गघसहवर्जमाद्याक्षरं यरलवाः मध्ये समानेया गुर्व
क्षरं मध्यस्थाने एवं नाम कुर्यात्॥ कृदंतं यथायोग्यं कुर्यात्॥ तद्धितांतं न कर्तव्यं॥
कन्यायाः विषमाक्षरं आकारांतं नाम॥ शर्मयुतं ब्राह्मणस्य॥ वर्मयुतं क्षत्रियस्य॥ ॥२३॥
गुप्तेति वैश्यस्य॥ अथवा र्गालें नाम ब्राह्मणस्य॥ शौर्यात्मकं क्षत्रीयस्य॥ धन
वृद्धिमत् वैश्यस्य नाम कुर्यात्॥ पंचदश ब्राह्मणान्भोजनसंकल्पः॥ ॥इतिना

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नकरणकर्म॥ ॥अथ निष्क्रमणकर्म॥ ॥चतुर्थे मासि शुभेऽह्नि श्राद्धं कृत्वा पिता बा
लकं बहिरानीय सूर्यमुदीक्षयति सूर्यमुदीक्षयेत तच्चक्षुर्देव०॥ ॥शालान्तर
नेन मंत्रेण सूर्यं पश्येत् ॥ ब्राह्मणाः पितुरेव मंत्रपाठः॥ पंच द ब्राह्मणान्भोजनं संक
ल्प्य ॥ ॥ इति निष्क्रमणकर्म ॥ ॥ अथान्नप्राशनकर्म ॥ ॥ षष्ठे मासेऽन्नप्रा
शने पूर्वं मातृकापूजनं ॥ नांदीश्राद्धं कुर्यात् ॥ अथ पंचभूसंस्कारपूर्वकं लौकिकाग्निस्थापनं
स्वाहा। इदं०॥ इंद्राय०॥ इदं॥ अग्नये०॥ इदं० सोमाय०॥ इदं०॥ अन्नप्राशनेऽग्नि
नाम्ने वैश्वानराय पूजनं॥ आज्याहुतिद्वयं देवीं वाचमजनयंत देवास्तां विश्वरू
पाः पशवो वदंति॥ सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा॥ इदं
देव्यै वाचे॥ इति प्रथमा॥ देवीं वाचमज०॥ सुष्टुतैतु०॥ वाजो नो अद्य प्रसुवा॥ अ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

घृ चरोः आहुतयश्चतस्रः॥ प्राणेनान्नमशीय स्वाहा॥ इदं प्राणाय॥ अपानेन गंधा
न्शीय॰॥ इदं अपानाय॥ चक्षुषा रूपाण्यशीय॰॥ इदं चक्षुषे॥ श्रोत्रेण यशोऽशीय॰॥ इदं
॥२४॥ श्रोत्राय॥ चरोः अग्नये स्विष्टकृते स्वाहा॰॥ इदं॰॥ नवाज्याहुतयः॥ भूः स्वाहा॥
भुवः स्वाहा॰॥ स्वः स्वाहा॰॥ त्वन्नः॰॥ स त्वन्नः॰॥ अयाश्चाग्ने॰॥ ये ते शतं॰॥ उदुत्तमं॰॥
प्रजापतये स्वाहा॰॥ संस्रवप्राशनं॥ पवित्राभ्यां मार्जनं॥ पवित्रप्रतिपत्तिः॥ प्र
णीताविमोकः॥ ब्रह्मणे पूर्णपात्रं दानं॥ अथ अथ्यसर्वान्रसांवै रसान्सर्वमन्नमे
कस्मिन्पात्रे उद्धृत्य प्रदक्षिणाग्रहस्तेन एकीकृत्य गायत्र्या दीसर्वान्नगरदीसावाल ॥२४॥
कं प्राशयेत्॥ एकब्राह्मणभोजनसंकल्पः॥ तत्तस्थाने तत्पुरूप चदराब्राह्मण
भोजनसंकल्पं कुर्यात्॥ दक्षिणां ब्राह्मणेभ्यो दद्यात्॥ पुण्याहवाचनं तिलका

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

शीवादांम्ब ॥ ततस्समाचारात् बालकं स्नु ज्वं नु मोच्य स्नाप्य गुरुतो रजस्तद्व्यानररसंगा
गुरुतयं च स्थापयेत् ॥ ततो बालकः स्वाप्यांग्रस्तातिसामर्त्तिकेया ॥ ॥ इति अ
न्नप्राशनं ॥ ॥ अथ चूडाकर्म ॥ ॥ तृतीये एकवत्सरे चलना किंचिच्छनेतरेनी
चेत्वर्षे वा यथाप्रांगल्ले कुलाचारेण वा ॥ तत्र प्रथमं मातृकापूजनं नांदिश्राद्धं च कुर्यात् ॥
ततो यथासंभवं ग्रहयज्ञं विधाय बहिःशालायामेव कर्तव्यं ॥ ब्राह्मणत्रयभोजयित्वा स्थं
डिले पंचभूसंस्कारान् कृत्वा ॥ लौकिकाग्निं स्थापयेत् ॥ ततः कुमारस्नाप्य अहतेवास्त्र
सी परिधाय माता कुमारं उत्संगे आधाय अग्नेः पश्चात् उपविशेत् ॥ ततो ब्रह्मोपवेश
नादि चरुश्रपणवर्ज्जं कुशकंडिकां कुर्यात् ॥ आसादने शीतोदकं ॥ कुशात्रणनिता मो
परिष्कृतआयसक्षुरः ॥ गोमयपिंड ॥ नापितः ॥ रुसांद्युपकल्पपर्युक्षणांते ॥ प्रजापतये

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्वा०॥इदं०॥इंद्राय०॥इदं०॥अग्नये०॥इदं०॥सोमाय०॥इदं०॥सभ्यायवैश्वानरायपूजनं॥
नवाज्याहुतयः॥भूः स्वा०॥इ०॥भुवः स्वा०॥इ०॥स्वः स्वा०॥इ०॥त्वंन्नः॥सत्वन्नः॥अयाश्चा
ग्ने०॥येते शतं०॥उदुत्तमं०॥प्रजापतये स्वा०॥आज्येनैव अग्नये स्विष्टकृ०॥संस्रवप्रा
शनं॥पवित्राभ्यां मार्जनं॥पवित्रप्रतिपत्तिः॥प्रणीताविमोकः॥ब्रह्मणे पूर्णपात्रं॥ततः
शीतोदकउष्णोदकमासिंचेत्॥उष्णेन वायुरुदकेनेह्यदितिकेशान्वपत्विति॥मंत्रेण त
तस्मिन्नेवोदके नवनीतपिंडं घृतपिंडं वा दधि वा निक्षिपेत्॥तस्मादुदकं गृहीत्वा कु
मारस्य दक्षिणं गोदानं दक्षिणकपोलो परिकेशान् उंदेत् आर्द्रीकुर्यात् सवित्रा प्रसूता दै
व्या आप उदंतु ते॥तनुं दीर्घायुत्वाय वर्चस इति॥ततस्त्रयाशलल्याकेशान् त्रीणिविनय
त्रीणि कुशतरुणानि कुशो परिधारयेत्॥ॐ ओषधे त्रायस्व०हिंसीः॥इतिमंत्रेण॥ततः शिवो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नामासि० दिर्धिसीरिति क्षुरं निदध्यात् ॥ ततः निवर्तयाम्या० यायुषेऽनेन ॥ वपेत् ॥
येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदम
स्यायुष्मांजरदष्टिर्यथासत् ॥ इति केशान्निकृन्तत्रुणानि प्रक्षिप्यात् ॥ ततउ
त्तरतो ध्रियमाणे गोमयपिंडे तान् प्रक्षिपेत् ॥ उष्णेनैव तत उदकमादाय द
क्षिणं गोदानं उंदेत् ॥ स्विरण्या० ॥ ऊं ल्पाविनीयन्तुष्णिकुशात्तृणानि तदुपरि दध्यात् ॥
तूष्णीं क्षुरादानं ॥ त्र्यंलोधिवपेत् ॥ तूष्णीं केशान्निम्नक्षिप्य गोमयपिंडे निक्षिपेत् ॥
एवं पुनरेकवारं कुर्यात् ॥ ततः शिरः पश्चिमभागे कुर्यात् ॥ ततउदकमादायप
श्चिमं गोदानं उंदेत् ॥ सविचय० ॥ च सं इति ततस्त्रिरण्यात्र ॥ ल्पाविनी यत्त्रिशिकु
शात्तृणानि दध्यात् ॥ ओषधत्राय० इति ॥ ततो मंत्रवर्जं क्षुरादानं कुर्यात् ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

अथममेवमन्त्रेण गृहीत्वा॥ ततानि वर्तयाम्य॥ इति अवपेत्॥ ततः आ
युषं जमदग्ने॥ इत्यनेन अधिद्य गोमयपिंडोनि क्षिपेत्॥ ततस्तत्रैव पुनर्वार
॥२६॥ द्वयं तूष्णिं कुर्यात्॥ उत्तरतो गोदाने एवं वत्॥ अवमेत्तेमन्त्रस्तु निर्वर्तयाः॥
ततः येन क्षुरिकारादिवं ज्योकपश्चाच्छिरूर्यतेननेवपामिक्त्रलः॥ जी
वातवं जीवना बहुश्लोक्या यस्वस्तय इति॥ अधिद्यान इति शेषः॥ पुनस्त्र
स्त्रीवार द्वयं कुर्यात्॥ ततः शिरसमंतात्॥ क्षुरं त्रिवारं कुर्यात्॥ यत्क्षुरे
ण मज्जयता सुपेशसा वाप्त्वा वा वपति केशान् छिन्धि शिरो मास्यायुः प्रमो ॥२६॥
षीः इति॥ ततो द्वितूष्णीं परिहरेत्॥ ततस्तान्निरक्षि कुमारस्य शिरः समु
ध अद्दीकृत्य नाधितायक्षुरं दत्वा वदेत्॥ अक्षराव परि वप इति ततो नापि

Takshashila Project

तः अक्षतवन्तं संवपेत् ॥ यथाकुलगोत्रव्यवस्थाशिखास्थापनं ॥ ततः सकेशं गोमयपिं
डं वस्त्रेण वेष्टयित्वा गोशालायां अश्मसरसि वा उदकान्ते वा निदध्यात् ॥ ततः समाचारात्
उद्वर्तनं कृत्वा कुमारं स्नापयेत् अलंकृत्य आनीय तिलकमाशीर्वादं कुर्यात् ॥ अन्येभ्यो
भ्यसीदत्त्वा ॥ स्वस्त्युक्तं पंचदश ब्राह्मणभोजनसंकल्पं कुर्यात् ॥ पुण्याहवाचनं ॥ इति
चूडाकरणकर्म ॥ अथ केशान्तकर्म ॥ चूडाकर्णवत् भवति तस्मादत्रैव लिख्यते ॥ परिपू
र्णे षोडशवर्षे शुभदिने कर्तव्यं ॥ सर्वमपि कर्म चूडाकरणवत् भवति ॥ कुत्रचित् मंत्रेऽ
ह विशेषः ॥ उष्णेन वायुरुदित्ते केशश्मश्रुवपइति ॥ यक्षुरेण मञ्जयता सुपेशसा वाप्ता वा
वपति केशांछिंधि शिरो मास्यायुः प्रमोषीरिति ॥ क्षुरेण मुखेन सह शिरः त्रिप्रदक्षिणं परि
हरेत् ॥ आचार्याय गां दद्यात् ॥ इत्यानेव विशेषः ॥ केशान्तकर्मानन्तरं संवत्सरं ब्रह्मचर्यं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

अवपनं च द्वादशरात्रे षड्रात्रे त्रिरात्रे वा॥ इति केशांतकर्म॥ अथ कर्णवेधः॥ ॥ वर्षे तृ-
तीये पंचमे वा शुभदिने मातृपूजनं नांदीश्राद्धं कृत्वा॥ ततः पूर्वाह्णे प्राङ्मुखं बालकं उपवे-
श्य कुमारस्य गुडशर्करादि मधुरं भक्षं दत्वा दक्षिणं कर्णं अभिमंत्रयेत्॥ भद्रं कर्णेभिः॥ यदा-
युः इत्यनेन॥ ततः सव्यं कर्णं अभिमंत्रयेत्॥ वक्ष्यंतीवेदा॰ पारयंतीति॥ ततो वेधं कुर्यात्॥
एक ब्राह्मणभोजनसंकल्पः॥ स्वस्तुक पंच दश ब्राह्मणभोजनसंकल्पः॥ ॥ इति कर्ण-
वेधः॥ ॥ अथ यज्ञोपवीतकर्म॥ ॥ पिता कृतमंगलस्नानः॥ नित्यं कर्म कृत्वा॥ मातृका-
पूजनं नांदीश्राद्धं ग्रहयज्ञं च कुर्यात्॥ ततो बहिः शालायामेव पंचभूः संस्कारान् कृत्वा स्थं-
डिले अग्निं स्थापयेत्॥ उपवीतं॥ मौंजि॥ मेखला॥ अजिनं॥ पालाशदंडं॥ कुमारस्य केश-
संमितं दंडं वा इत्यादि परिकल्प्य॥ पंचवर्षोत्तरं मष्टवर्षे अधिकारिणं कुमारं उपनयेत्॥ २७

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कुमारस्य मुंडनं कृत्वा त्रिभिर्ब्राह्मणैः सह कुमारं भोजयेत्॥ ततः पुष्पमालादिना अलंकृत्य॥
कुमारं आनीय अग्नेः पश्चिमभागे कुमारं अवस्थाप्य॥ आचार्यो वदेत्॥ ब्रह्मचार्यमागां न
इति ब्रूहि॥ ततः कुमारो वदेत् ब्रह्मचार्यमागां॥ पुनराचार्य वदेत्॥ ब्रह्मचार्यसानि इति ब्रू
हि॥ ततः कुमारो वदेत्॥ ब्रह्मचार्यसानि॥ अथाचार्यः एनं कुमारं वासः परिधापयति॥
आचमनं॥ येनेंद्रायेत्यस्य गिरिज ऋषिः बृहस्पतिश्छंदो बृहस्पतिर्देवता वस्त्रधारणे विनियो
गः॥ येनेंद्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बला
य वर्चस इति॥ आचार्यो स्येवमंत्रपाठः॥ अथ मेखलां बध्नीत॥ इयं दुरुक्तमेवामदेव
ऋषिस्त्रिष्टुप्छंदो मरुतो देवता मेखलाबंधने॥ युवा सुवासा इति विश्वामित्रऋषिः त्रि
ष्टुप्छंदो विष्णुर्देवता वस्त्रधारणे वि०॥ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

आगात्॥ प्राणापानाभ्यां बलमादधाना नावहरांपवित्रेनास्वसादेविसुभग
२८ मेखलेइति॥ युवासुवासाइतिविश्वामित्रऋषिः॥ त्रिष्टुप्छंदः॥ विश्वेदेव
तावस्त्रधारणेवि०॥ अथवायुवासुवासायपरिवीतआगात्सउश्रेयान्भव
तिजायमानः तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतइति॥ दंड
मंत्रेणवातूस्नींवा॥ मेखलांबध्नीतकुमारस्यवमंचभावः॥ ॥ अथय
ज्ञोपवितपरिधानं॥ ॥ आचमनं॥ यज्ञोपवितइतिमंत्रस्यपरमेष्ठीऋ
षिःपरमात्मादेवतागायत्रीछंदः सर्वकर्मानुष्ठानसिध्यर्थेजपेविनियो
ज्ञोपवितधारणेविनियोगः॥ यज्ञोपवितपरमंपवित्रंप्रजापतेर्यत्सहज ॥२८
पुरस्तात्॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवितंबलमस्तुतेजः॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यज्ञोपवितमसियज्ञस्यत्वायज्ञोपवितेनोपनह्यामि॥ अनेनयज्ञोपवीतंपरी
धापयेत्॥२॥ रखांतरमंत्रः॥ आचायस्यकठेऽमंत्रपाठः॥ आचा
यजिनंप्रयछति॥ बटुकस्तंगृहीत्वापरिधारयेत॥ आत्वमनं॥ मित्र
स्यचक्षुरितिपरमेष्ठिऋषिः त्रिष्टुपछंदः लिंगोक्तदेवताकृष्णाजिन
धारणेवि॰॥ मित्रस्यचक्षुर्धरणंबलीयस्तेजोयशस्वीस्थवीरंसमिद्धं
॥ अनाहनस्यवसनंजरिष्णुपरिदंदंवाज्यजिनंदधेयंइतिबटोर्मंत्रपा
ठः॥ आचार्योबटवेदंडंप्रयछतितद्दंडंबटुःप्रतिगृह्णीयात्॥ योमेदंड
इतिमंत्रस्यप्रजापतिर्ऋषिः॥ यजुर्गायत्रीछंदः॥ प्रजापतिर्देवतादं
डग्रहणेविनि॰॥ योमेदंडःपरापतद्वैहायसोधिभूम्यां॥ तमहंपुनरा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ददाम्यायुष्यत्रसौब्रह्मवर्चसाइति वदेत् मंत्रपाठः ॥ अथाचार्यः उदकं
२९ पूरितेन स्वांजलिना वटोरंजलिं पूरयेत् ॥ आपो हि ष्ठेति तिसृणां सिंधु
द्वीप ऋषिः आपो देवता गायत्री छंदः अंजलिदाने वि० ॥ आपो हि ष्ठा० ॥
तस्मा अरं गमा० ॥ यो वः० ॥ आचार्यस्य मंत्रपाठः ॥ ततो बटुकरंजलित्रद्वि
पेत् ॥ ततः आचार्यः एनं बटुं सूर्यमुदीक्षयती ॥ सूर्यमुदीक्षस्व ॥ ततो बटु
सूर्यं पश्येत् ॥ तच्चक्षुरिति प्रजापतिर्ऋषीः स्यात् पुरउष्णिक्छंदो वटस्सूर्यो देवता ॥ ति
सूर्यावलोकने वि० ॥ तच्चक्षुर्देव० ॥ शातात्स्या इति वटोर्मंत्रपाठः ॥ अथाचा २९ ॥
र्यः बटोर्दक्षिणांसोपरि स्वहस्तं नीत्वा अधिहृदयं आलभेत ॥ इदालंभन
न विश्वामित्र ऋषिः गायत्री छंदो बृहस्पतिर्देवता हृदालंभने विनि० ॥ मम

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु ॥ मम वाचमेकमना जुषस्व ॥ बृ
हस्पतिष्ट्वा नियुनक्तु मह्यं आचार्यमंत्र: ॥ आचार्य: बटोर्दक्षिणं हस्तं
गृहीत्वा पृच्छेत् ॥ को नामासि ततो बटु: अमुकशर्माहं भो इति ॥ तत: आचा
र्य: पृच्छेत् ॥ कस्य ब्रह्मचार्यसि ततो बटु भवत: इति वदेत् ॥ इंद्रस्याग्निराचार्यस्त
व असौ अमुकशर्मा अहमाचार्य: ॥ आचार्य: रक्षार्थमेतेभ्यो देवेभ्य: परिद
दामि ॥ प्रजापतये त्वा परिददामि ॥ द्यावापृथिवीभ्यां त्वा परिददामि ॥ विश्वे
भ्यस्त्वा भूतेभ्य: परि० ॥ सर्वेभ्यस्त्वा भूतेभ्य: परि० ॥ अरिष्ट्या इति ॥ आ
चार्य: पठेत् ॥ ततो बटुरग्निं प्रदक्षिणीकृत्य आचार्योत्तरतः पश्चिमो
त्त ॥ तत आचार्य ब्रह्मोपवेशनादि चरुवर्जं कुशकंडिकां कृत्वा ॥ पर्युक्षणं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नेत्र्याज्याहुतयः॥प्रजापतये स्वाहा॥इ०॥इंद्राय०॥इ०॥अग्नये०॥इ०॥सोमाय०॥इ०॥
ततो बंधेरप्युद्भवनाग्नि वैश्वानराय पूजनं॥भूः स्वा०॥इ०॥भुवः स्वा०॥इ०॥स्व
स्वा०॥इ०॥त्वन्नः॥सत्वन्नः॥अयाश्चाग्ने०॥येते शतं॥उदुत्तमं॥प्रजापतये स्वा०
आज्येनैव अग्नये स्विष्टकृते स्वा०॥इ०॥ततः संस्रवप्राशनं॥पवि०मार्जनं॥
पवित्रप्रतिपत्तिः॥प्रणीताविमोकः॥ब्रह्मणे पूर्णपात्रं॥आचार्यः एनं अनुशास
येत्॥आचार्यो वदेत् ब्रह्मचार्यसि॥बटुः असानि॥आचार्यो वदेत्॥अपोशान॥
ततो बटुः अश्नानि॥आचा०॥कर्म कुरु॥करवाणि॥आचा०॥मावासुषुप्थाः॥बटु० दि २
न स्वपामि॥आचा०वाचं यच्छ॥बटुः॥यच्छानि॥आचा०॥समिधमाधेहि॥बटु०॥आद
धानि॥आचा०॥अपोशान॥बटु०अश्नानि॥ ॥अथ गायत्रीप्रदानं॥प्राङ्मुख आचा ३०

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

र्यः अग्नेरुत्तरतः प्रत्यङ्मुखं उपविष्टं आचार्याभिमुखं पश्यन्तं गुरुपादोपसंगृह्य उपविष्टं
ब्रह्मचारिणं पश्यन् उपदिशेत् ॥ समाचारात् हस्तेन गृह्य ॥ ॐ भूर्भुवः स्वः ॥ ॐ तत्सवि
तुर्वरेण्यं ॥ ततः भर्गो देवस्य धीमहि ॥ ततः धियो यो नः प्रचोदयात् ॥ पुनर्द्वितीयवारं
अर्द्धर्चं ॥ तृतीयवारं सर्वां गायत्रीं उपदिशेत् ॥ बटुरपि सहैव पठेत् ॥ अथाग्नौ समिधा
दानं ॥ बटुः कुर्यात् ॥ तद्यथा ॥ हस्तेनैव आरण्यं शुष्कं गोमयपिंडप्रक्षेपणेन अग्निं सि
धुक्षेत् ॥ पंचभिर्मंत्रैः पंचवारं ॥ अग्ने सुश्रव इति ब्रह्मा ऋषिः यजुः गायत्री छंदः अग्निर्दे
वता सिंधुक्षणार्थे विनि० ॥ अग्ने सुश्रवः सुश्रवसं मा कुरु ॥ १ ॥ यथा त्वमग्ने सुश्रवः सौ
श्रवा असि ॥ २ ॥ एवं मां सुश्रवः सौश्रवसं मा कुरु ॥ ३ ॥ यथा त्वमग्ने देवानां यज्ञस्य नि
धिपा असि ॥ ४ ॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति ॥ तत उदकेन अग्निं पर्यु

Takshashila Project

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

श्रयउत्तिष्ठन्एकंसमिधंअग्नौआदध्यात्॥अग्नेसमिधेतिप्रजापतिरृषिःरनुष्टुप्छंदः
अग्निर्देवतासमिधादानेविनि०॥ॐअग्नयेसमिधमहार्षंबृहतेजातवेदसेयथात्वम
ग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनसमि
धेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादोभू
यासꣳस्वाहा॥इदंसंतेनप्रथमांसमिधमादध्यात्॥पुनरनेनमंत्रेणद्वितीयांतृतीयां॥ए
षतेइत्यनेनमंत्रेणवा॥अग्नयेसमिध०॥एषाइतिमंत्रद्वयेनवासमिदाधानंकुर्यात्॥त
तःपुनःआरण्यशुष्कगोमयपिंडैःपंचवारंप्रतिमंत्रेसिंधुक्षणंतथैवकुर्यात्॥अग्नेसुश्र
वेतिब्रह्माऋषिर्यजुर्गायत्रीछंदः॥अग्निर्देवतासंधुक्षणार्थेविनि०॥अग्नेसुश्रवःसुश्र
वसंमाकुरु॥१॥यथात्वमग्नेसुश्रवःसुश्रवाअसि॥२॥एवमाꣳसुश्रवःसौश्रवसंमाकुरु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

३॥ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि॥ ॥ एवमहंमनुष्याणांवेदस्यनिधिपोभूया
सं॥ ५॥ ततोबद्धउभौहस्तौअग्नौप्रतप्यसत्वारंइतिमंत्रंमुखंविमृष्टेत॥ तनूपाअग्नेसि
तन्वंमेपाहि॥ आयुर्दाअग्नेस्यायुर्मेदेहि॥ वर्चोदाअग्नेसिवर्चोमेदेहि॥ अग्नेयन्मेतन्वा
ऊनंतन्मआपृण॥ मेधांमेदेवसविताआदधातु॥ मेधांदेवीसरस्वतीआदधातु॥ मे
धांवश्विनौदेवावाधत्तांपुष्करस्रजौ॥ ततोंगानिआलभेत॥ यथामंत्रं॥ अंगानिचमआ
प्यायंतां॥ इतिसर्वांगानि॥ वाक्चमआप्यायतां॥ मुखं॥ प्राणश्चमआप्यायतां॥ नासिका
द्वयंयुगपत्॥ चक्षुश्चमआ०॥ चक्षुर्द्वयं०॥ श्रोत्रंचमआ०॥ दक्षिणकर्णं॥ पुनश्रोत्रंचमआ०॥
वामकर्णं॥ यशोबलेइतिमंत्रपाठः॥ ततस्त्र्यायुषाणिकुर्यात्॥ हस्तेनअग्नेर्भस्मगृहीत्वाय
थास्थानंमंत्रेणस्पर्शयेत्॥ त्र्यायुषंजमदग्नेःललाटे॥ कश्यपस्यत्र्यायुषंग्रीवायां॥ यद्देवेषु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

आयुष्मं॥ दक्षिणो असे॥ तन्नो अस्तु आयुष्मं कृदि॥ अत्रावसरे बटुः कृतांज
३२ लिः स्वगुरुं पितरं अन्यान् पितृव्यान् अभिवादयेत्॥ अमुकशर्मोऽहं अमुक
प्रवरोऽहं अमुकशर्माहं भो अभिवादयामि॥ ततस्ते आशीर्ब्रूयुः आयुष्मान्भ
व॥ ॥अथ भिक्षाचरणं॥ ॥ॐ भवति भिक्षां देहीति ब्रूयात् ब्राह्म
णो ब्रूयात्॥ भिक्षां भवति देहीति क्षत्रियः॥ भिक्षां देहि भवतीति वैश्यः॥
वासुदेवपद्धतिः॥ बटुकं ब्रूयात्॥ प्रथमं मातरमेव भिक्षायाचेत ततो भोमाता
ब्रह्मचारिणे भिक्षां दद्यात्॥ तां भिक्षां आचार्याय निवेदयेत्॥ अथ ब्रह्मचा ३२
रिणो धर्माः॥ षट्द्वादशायपरिमितां वा भिक्षां गृह्णाति ततो भिक्षां आचार्याय नि
वेदयित्वा गुरुणानुज्ञातो भिक्षां भुंजीत॥ भोजनांतरं संध्यापर्यंतं तिष्ठे

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

तत्प्रच्छंतरितिप्रत्यश्चं दंडादीनां विमोकः ॥ तत्र दंडं न प्रच्छं नरिति ॥ मेखलां कृतोवेति ॥ यतोपवीत
त्सः ॥ एवमेकैकं दंतिधाणीपीडाम कुर्वन्स्वनतरुणिध श्चाइत्सः ॥ एवमेवेणात्र
यस्मिन्दाधानं दध्यास्त्वत्र अभिवादनांतं कुर्यात् ॥ पश्चाद्वाग्विसर्गः ॥ त्रिरात्रा
यां तेषु स्वावेव शयनं ॥ अक्षारालवणाशनं दंडधारणं ॥ अग्निपरिचर्यां गुरु
सेवनं मधुमांसवर्जनं चेत्युक्तोऽनं कुर्यात् ॥ उत्वासनोपवेशनं ॥ स्त्रीसान्निध्यं ॥
अनृतभाषणं ॥ अदत्तद्रव्यग्रहणं च वर्जयेत् ॥ गुरुणाऽऽकारितः सन् ॥ उपवी
ष्टेन श्रेद्रुस्थाय कृदितिस्वादरं प्रगृणुयात् ॥ शयानं गुरुं उपविष्टः सन् ॥ उपव
ष्टं तं उपविष्टं गुरुं स्वयं तिष्ठन् ॥ तिष्ठं गुरुं अभिगच्छन् ॥ अभिक्रामंतं गुरुं अ
भिधावन् ॥ बालस्य नववर्षानंतरं षोडशवर्षपर्यंतं गौणकालः ॥ तदा अलादी
र्घप्रायश्चित्तं कृत्वा उपनयं कुर्यात् ॥ षोडशाब्दोर्ध्वं पतितसावित्रीकः सर्वे
प्रनष्टाकृताणि तानि प्राशयेत् ॥ ततः स्वस्वमंत्रैः पूर्ववत् मेखलादीनां समर्पणं ॥
इति प्रायश्चित्तार्थं नवाहुतीः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

स्याऽनधिकारिण्णवेदः॥ ॥इति अनुबंधः॥ ॥पृथक्काले विवाहांते श्वेतदाना
त्स्कान्पुजनं नांदीश्राद्धं च कुर्यात्॥ एकैकदेव क्रियते चेत्तदा तु सर्वे कृतमेव
२२ तैर्तिः॥ पंचस्वसंस्कारान्कृत्वा स्वगृह्योक्ते अग्निस्थापयेत्॥ अंतपवेशनादि
चरुवर्जं पर्युक्षणादिकृत्वा॥ तत आज्याहुतयः॥ प्रजापत०॥इ०॥इंद्राय०॥इ०॥
अग्नये०॥इ०॥सोमाय०॥इ०॥ घृतादेरायज्यताग्निर्वैश्वानराय श्रुत्वा॥ सनाका
रात सर्ववेदाहुतयो यजुर्वेद श्रुवीका॥ ॥अंतरिक्षाय स्वाहा॥ ॥इदमंतरिक्षाय॥
वायवे०॥इदं०॥ब्रह्मणे०॥इदं०॥छंदोभ्यः॥इदं०॥पृथिव्यै स्वा०॥इदं०॥ अग्नये० २२
॥इदं०॥ब्रह्मणे०॥इदं०॥छंदोभ्य०॥इदं०॥दिवे स्वा०॥इदं०॥सूर्याय०॥इदं०॥
ब्रह्मणे०॥इदं०॥छंदोभ्यः॥इ०॥दिग्भ्यस्स्वा०॥इदं०॥चन्द्रमसे स्वा०॥इदं०॥ब्रह्म

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

णे॰॥इदं॰॥छंदोभ्यः॥इदं॰॥प्रजापतये स्वाहा॰॥इदं॥देवेभ्यः॥इदं॰॥ऋषिभ्यो॰॥इदं॰॥श्र
द्धायै॰॥इदं॰॥मेधायै॰॥इदं॰॥सदसस्पतये॰॥इदं॰॥अनुमतये॰॥इदं॰॥नवाहुतयः॥भूः
स्वाहा॰॥इदं॰॥भुवः स्वाहा॰॥इदं॰॥स्वः स्वाहा॰॥इदं॰॥त्रिंन्द्रः॥स्विष्टकृताः॥यथा स्वाज्येन॰॥येनेष्ट
तं॥उदुत्तमं॥प्रजापतये॥अग्नये स्विष्टकृते॰॥इदं॰॥संस्रवप्राशनादि समाप्य॥
ततोग्नेरुत्तरतः पूर्ववत् उपविश्य स्ववेदारंभं कुर्यात्॥ततो द्वांदंशं सहाचार्य
स्तु पुस्तकस्य गुरोश्च पूजनं कृत्वा कारंभेत्॥ततो वेदाध्ययनं कुर्यात्॥ततो द्वा
दशावर्षं ब्रतं च कुर्यात्॥ ॥इति वेदारंभः॥ ॥अथ ब्रतविसर्गः॥यथा संचयं वे
दाध्ययनं कृत्वा॥विवाहकाले गायत्रीकंध्येत तदा पुनर्नांदीश्राद्धं कृत्वा मातृका
पूजनं च कर्तव्यं॥कालांतरमातृकापूजनं नांदीश्राद्धं कृत्वा॥स्थंडिले पंच भूसं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

दशकर्म॥

स्कारान्कृत्वाग्निंस्थापयेत्॥ ततोब्रह्मोपवेशनादिचक्षुर्वर्जंपर्युक्षणांतंकृत्वा

आज्याहुतयः॥ प्रजापतये॰॥इ॰॥इंद्राय॰॥इ॰॥अग्नये॰॥इ॰॥सोमाय॰॥इ॰॥ विसर्गो

२४ बुधनान्ते वैश्वानराय॰॥इ॰॥ विदाहुतयः॥ अंतरिक्षाय स्वाहा॰॥इ॰॥वायवे॰॥इ॰॥ब्र

ह्मणे॰॥इ॰॥छंदोभ्यः॥इ॰॥पृथिव्यै॰॥इ॰॥अग्नये॰॥इ॰॥ब्रह्मणे॰॥इ॰॥छंदोभ्यः॥इ॰॥

दिवे॰॥इ॰॥सूर्याय॰॥इ॰॥ब्रह्मणे॰॥इ॰॥छंदोभ्यः॥इ॰॥दिग्भ्यः स्वाहा॰॥इ॰॥चंद्रमसे॰॥

इ॰॥ब्रह्मणे॰॥इ॰॥छंदोभ्यः॥इ॰॥प्रजापतये॰॥इ॰॥देवेभ्यः॥इ॰॥ऋषिभ्यः॥इ॰॥

श्रद्धायै॰॥इ॰॥मेधायै॰॥इ॰॥सदसस्पतये॰॥इ॰॥अनुमतये॰॥इ॰॥नवाहुतयः॥ २४॥

भूः स्वाहा॰॥इ॰॥भुवः स्वाहा॰॥इ॰॥स्वः स्वाहा॰॥इ॰॥त्वंनः॥॥सत्वंनः॥॥अयाश्चाग्ने॥॥ये

तेशतं॥॥उदुत्तमं॥॥प्रजापतये॰॥इ॰॥अग्नयेस्विष्टकृते॰॥इ॰॥संस्रवप्राश

नादि समाप्य ॥ ततः समिदाधानं ॥ अलंचरिष्णुर्व्रतं कुर्यात् ॥ पाणिनाग्निं परि
समूहति स्वारस्य विच्छित्ति धारणं अभिवादनांतं सर्वेष्णुर्व्रतं ॥ कुर्यात् ॥ संधुक्ष
णं पतिमंत्रं पंचवारं ॥ अग्ने सुश्रव इति अलातस्त्रिष्टुप्गायत्री छंदोऽग्निर्देवता संधु
क्षणार्थे विनि० ॥ अग्ने सुश्रवः सुश्रवसं मा कुरु ॥ यथा त्वमग्ने सुश्रवाः सुश्रवा अ
सि ॥ एवं मां सुश्रवः सौश्रवसं मा कुरु ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा अ
सि ॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ॥ ततः पर्युक्षणं ॥ उत्तिष्ठन्द्विती
यं तथा तृतीयां ॥ ततः पुनर्मंत्रं चवारं ॥ अग्ने सुश्रव इत्यादि त्रिः संधुक्षणं कुर्यात् ॥ अ
ग्ने सुश्रवः सुश्रवसं मा कुरु ॥ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॥ एवं मां सुश्रव
सौश्रवसं कुरु ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असी ॥ एवमहं मनुष्याणां वे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

दस्यनिधिपोन्नयासं॥ ततः करोपात्तव्यघृतिमन्त्रेणुरवंविन्देत्॥ तान्हणा॥ आयुर्दा॰
॥३५॥ वर्च्चोदा अग्ने॥ अग्नेयं॥ मेधां मे देव॥ मध्यं देवी॥ मेधावश्विनौ॥ ततोंगानि आ
लभेत्॥ अंगानि च म आप्यायन्तां सर्वांगानि॥ वाक्॥ प्राणश्च॥ चक्षुश्च म॥ श्रोत्रं
च म॥ श्रोत्रं च यशो बलं मन्त्रपाठः॥ ततो हस्तेन भस्म गृहीत्वा लापयेत्॥ त्र्या
युषं॥ ललाटे॥ कश्यप॥ ग्रीवायां॥ यद्देवे॥ दक्षिणांसे॥ तन्नो अस्तु॥ हृ
दि॥ ततो अमुकगोत्रप्रवरो अमुकशर्माहं भो अभिवादयामि॥ तत आयुष्मान् भ
व॥ उत्थाप्य त्रिषा चरुद्धा कूसु॥ ततः परिश्रितस्य वृत्तविसर्गीयेवस्त्रादिविरचितस्य ॥३५॥
तस्य उत्तरतः अभिषेकार्थं अष्टौ कलशान् जलेन पूरयित्वा स्थापयेत्॥ ततः पुर
स्तात् प्रागग्रेषु दर्भेषु निविष्टस्य अभिषेकं कुर्यात्॥ येषां नरस्तम्बप्रविष्टा गोष्ठ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

स्व वि
मधुरेणमनोहरस्वरेण दुरुदुरुसलदुदुमुरिधिप्रदातां त्विजामभिषेचनस्याभिलषिता
मि॥ अनेन प्रथमकलशादुदकं गृहीत्वा सर्वेभ्यः॥ कलशेभ्यः जलं गृहीत्वा येषां तर
रुणयः अयमेव मंत्रः॥ अभिषेके मंत्रमेतदप्यमुं॥ तेन मामभिषिंचामि श्रियै यश
से ब्रह्मणे ब्रह्मवर्चसाय यत् इत्यनेन स्वमभिषिंचेत्॥ ततो द्वितीयस्मात्॥ तेन मभि
यमकृणुतां येनाब्रह्मता ईयुरां॥ येनाग्रावभिषिंचतां यद्वांतदश्विना यश
इत्यभिषिंचेत्॥ तृतीयकलशोदकं॥ येषां तरुणयः इत्यनेन गृहीत्वा॥ आपो हि
ष्ठा॥ चतसृभिरभिषिंचेत्॥ ततः चतुर्थकलशमादाय॥ येषां तरुणयः इत्यने
न गृहीत्वा॥ योवः शिवो॥ तरः इत्यनेनाभिषिंचेत्॥ ततः पंचकलशात्॥ येषां त
रुणयः इत्युदकं गृहीत्वा॥ तस्मा अरंगमा॥ चतसृभिरभिषिंचेत्॥ ततस्तेनैव मंत्रे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

णग्रहित्वा॥ये स्संतरग्नयः इत्यनेन बध्नात्॥ ज ॐ दृढित्वात्हस्मिं अग्निमिंचेत्॥
३९ एवं सप्तमात्॥ अश्मा चतुर्दिमीनेवाजिनेक॥ तत्तमेखलामोचनं॥ कुर्यात्॥
उदुत्तमं॥ स्वानद्रतिरीरीरामा गेर्हीं उत्तारर्यन्हलौनिदध्यात्॥ दंडं चत्वरुंमीत्हणी
न्हलौ निदध्यात्॥ अन्य वस्त्रं परिधार्य स्त्रर्योपस्थानं कुर्यात्॥ उद्यन्भ्राजकृष्णु
रिजोमरुद्भिरस्थात्यातर्यावभिरस्था दशसनिरसि दशसनिंमाकुवीविदन्मा
गमय येद्यन्भ्राजकृष्णुरीजोमरुद्भिरस्था दिवायामभिरस्था शतसनिरसि शत
सनिंमाकुवीविदन्मागमय योद्यन्भ्राजकृष्णुरिजोमरुद्भिरस्था सायंयावभिर
स्था सहस्रसनिरसि सहस्रसनिंमाकुवीविदन्मागमय इत्युपस्थाय॥ ततो ३९
दधिनिजीन्खाद्याश्य॥ आचम्य जटालोमनखानां निकृंतनं कुर्यात्॥ ततश्रो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

दधरकाष्टेन दंतधावनं कुर्यात् ॥ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् ॥ स मे
मुखं प्रमार्क्ष्यते यशसा च भगेन च ॥ ततः शरीरे उद्वर्तनं कृत्वा स्नानं कुर्यात् ॥
स्नानानंतरं कुंकुमाद्यनुलेपनं हस्तयोः कृत्वा नासिकयोर्मुखे च अपगृह्णीयात् ॥
प्राणापानौ मे तर्पय चक्षुर्मे तर्पय ॥ श्रोत्रं मे तर्पय ॥ हस्तेनेनाद्यात् ॥ अपस
व्यं कृत्वा उदकं हस्तयोर्गृहीत्वा पितरः शुंधध्वं इति दक्षिणतो निनयेत् ॥ तत अनुले
पनं कृत्वा जपेत् ॥ सुचक्षा अहमक्षीभ्यां भूयासं इति ॥ ततो वासः परिदध्या
त् ॥ परिधास्यै यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि ॥ शतं च जीवामि शरदः
पुरूचि रायस्पोषमभिसंव्ययिष्य इति ॥ अथोत्तरीयं धारयेत् ॥ यशसा माद्या
वापृथिवी यशसेंद्रावृहस्पती ॥ यशो भगश्च माविंदद्यशो मा प्रतिपद्यतां ॥ त

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

।घर्मे॥

तः पुष्यमाः शंगृह्णीयात्॥ प्या-आहरत्रजमन्दृश्नि: अन्नायेनेधायैकात्मायेद्रियाय॥
३१ ताहं अतिग्रहाभिय ससाच-नगेनचरतिग्रहीत्वातां बध्नियात्॥ यद्य-रोऽस्मर
सारमिंद्र अथकारविपुलं यु॥ तेनसंग्रथिताः सुमनस आबध्नामि यशो मयीइति
॥ ततउष्णीये एग्निरोवेष्टयेत्॥ युवासुवासाः परिवीत आगात्-सोश्रेयान्भवति
जायमानः तंधीरासकवयउन्नयंति स्वाध्यो मनसा देवयंतइति॥ ततः कर्णयो
रान्नेयरोपरिदध्यात्॥ अथमंदादिरोकर्णेअलंकरणमसिन्नेयोलंकरणं न्ने
यात्॥ ततोव्यानकर्णेअलंकरणं॥ इतिध्नत्वा॥ ततोनेत्रयोः कज्जलेनांजनंकु
र्यात्॥ वृत्रस्यासिकनी॥ वामनेत्रं॥ सामा-चारादत्रकं चुकंकटिवेष्टनं त्वा अन्यान्य ३१॥
पिन्नेयणानिधृत्वा अदर्शेप्रतिबिंबनं स्यात्मानपश्येत्॥ राचीसुरिसिरति॥
नीनकृ॰ देहिरित्दिदक्षिणनेत्रं॥ वृत्रस्यासिक॰॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

ततः छत्रं गृह्णीयात् ॥ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माम
न्तर्धेहि ॥ ततः उपानहौ पद्भ्यां युगपत् परिदध्यात् ॥ प्रतिष्ठे स्थो विश्वतो मा पा
तं इति ॥ ततो वैणवं दण्डं दद्यात् ॥ विश्वाभ्यो मा नाष्ट्राभ्यस्परि पाहि सर्वत इति
॥ ततः अत्रावसरे पुनन्त्रित्वा चरणं कुर्यात् ॥ सर्वे दत्तं न्त्रित्वा प्रतिग्रहपुस्तकं
उदपात्रं बध्ये यच गृहीत्वा बराणसीं प्रति अध्ययनार्थं गच्छेत् ॥ पश्चात् मा
तुलादि सर्वं न्नाति नेयं बहुकं किंचिद् दत्वा संतोषयित्वा गृहं समानयेत् ॥ इति
व्यवहारः ॥ ततः आचार्याय दक्षिणां दद्यात् ॥ अन्येभ्यो भूयसीं च दद्यात् ॥
ततः स्रुक्स्रुवचयपिंशा ब्राह्मणभोजनसंकल्पं कुर्यात् ॥ तिलकं कृत्वा पुण्याहं
वाचनाशीर्वादं पठेयुर्द्विजाः ॥ ॥ इति कर्म समाप्तः ॥ ॥ ततः आचार्य एतान्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

धर्मान् श्रावयेत्॥ शिखार्थी॥ बटु॥ दंतधावनादीनि अस्पृश्य॥ लौकिकैरेव मंत्रैः
॥३८॥ संध्यां कुर्यात्॥ न च वस्त्र प्रयोगानल्प्रदहोमं त्याः न तु अस्य फं॥ ॥अथ स्नातस्य
नियमाः॥ ॥नृत्यगीतवादित्राणि न कुर्यात्॥ अन्यैः क्रियमाणं न पिनपश्येत्
स्वयमपि गानं न कुर्यात् दिवसे केशमेलं तिराश्रोध्यामांतरगमनं सदैव तुरयाधावनं च व
र्जयेत्॥ जलेन प्रतिबिंबवलोकनं वृक्षारोहणं तत्फलपतनं॥ संध्याकाले भो
जनं॥ अवस्य स्नानं॥ पर्वताग्रतीर्थ विषमल्लोघनं॥ स्त्रीआलापनं॥ संध्याकाले
सूर्यावलोकनं॥ च निंदाचर्यं च वर्जयेत्॥ व्रतनिषेधे चेतष्टे तदा अनादित
तदेह- अयमेव ज्ञः मामा नमपरुना॥ इति मंत्रं पठित्वा व्रजेत्॥ अल्पवयस्को ३६
वा स्वभावादजातलोम्नी विधवा षंढं च नोपहसेत् न आलिंगयेत्॥ इदं स्यां जर्सि

Takshashila Project

ली बिजं न्याद् इति वदेत्॥ नकुलं तु सकुलं॥ कपालं तु भगालं॥ इंद्रस्य धनुस्तु मणीधनु
रिति नाम्ना वदेत्॥ वत्सं धयंतीं गां परस्मै न वदेत्॥ सस्य वत्सं नो तण्णा नाद्या
दि ताध्या च मनो मूत्र पुरीषे न कुर्यात्॥ गच्छन् तिष्ठन् अपि न कुर्यात्॥ पुरीषोत्स
र्गानंतरं शीर्णकाष्ठेन गुदं प्रमृज्यात्॥ स्फटित संधितं वस्त्रं न धारयेत्॥ व्रते दाकं
कुर्यात्॥ शरणागतं त्यागयेत्॥ सर्वेभ्यः उपद्रवेभ्यः आत्मानं रक्षेत्॥ सर्वेषां जना
नां मित्रवत् व्यवहरेत्॥ ॥ अथ चिराचरितं चरेत्॥ ॥ मांसाशनं मद्यपानं चरेत्
जलपानं स्त्रीस्पर्श शवकाकश्वना च दर्शनं संभाषणं च वर्जयेत्॥ शवस्पृष्ट्वा तडाका
न्ते स्नुयात्॥ वृक्षपुष्पफलपत्रवनानि घातयेन कुर्यात्॥ आतपनिवारणार्थं छ
त्रं दिनांते दध्यात्॥ तप्तोदकेन उदकार्घ्यं कुर्यात्॥ रात्रौ दीपं स्थालाचुज्या

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

त॥तस्यस्नाचरणमेवकुर्यात्॥ ॥६ इतियज्ञोपवितव्रतविसर्गंतसमाप्तं॥ ॥संव

त् १९८९ वर्षे शाके १८५४ प्रवर्तके फाल्गुन मासे शुक्लपक्षे पंचम्यां तिथौ मंदवास

॥३९॥ रे लखीतं वंशपुरमध्ये नागरज्ञातनगरायाज्ञिककाशीनाथसुतवंशीधरेण

आत्मपठनार्थं लखितंमिदं॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.